Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ श्रीजिनाय नमः ॥

॥ अथ ॥

# श्रीयुक्तिप्रकाशः—टीकासहितः—( कर्त्ता श्रीपद्मसागरगणी )

# श्रीस्याद्वादकलिका—( कर्त्ता श्रीराजशेखरसूरिः )

# श्रीअष्टकानि—( कर्त्ता श्री हरिभद्रसूरिः )

छपावी प्रसिद्ध करनार.

पंडित श्रावक हीरालाल वि. हंसराज.

किंमत—रु.—०—८—०.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

☞ जामनगर श्रीजैनभास्करोदय छापखानामां छाप्युं. ☜

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥ श्रीजिनाय नमः ॥

# अथ श्रीयुक्तिप्रकाशविवरणं प्रारभ्यते. ॥

## ( कर्त्ता—श्रीपद्मसागरगणी )

॥ मूलम् ॥—प्रणत्य व्यक्तभक्त्या श्री-वर्द्धमानक्रमांबुजं ॥
आत्मार्थं तन्यते युक्ति-प्रकाशो जैनमंडनं ॥ १ ॥

॥ टीका ॥—प्रणम्य श्रीमहावीरं, नम्राखंडलमंडलं ॥ कुर्वे युक्तिप्रकाशस्य, स्वोपज्ञां वृत्तिमादरात् ॥ १ ॥ प्रणम्येति—॥ श्रीवर्द्धमानः श्रीमहावीरनामाऽस्यामवसर्पिण्यामंतिमजिनस्तस्य क्रमांबुजं पादपद्मं प्रणम्य नत्वा युक्तिप्रकाशनामा ग्रंथो मया तन्यत इति तावदन्वयः, तत्र व्यक्तभक्त्येति करणपदं वीरप्रणामविशेषणं तथा च व्यक्तभक्त्यन्वितप्रणामस्य बलवन्मंगलभूतत्वेन प्रत्यूहव्यूहोपशमनार्थमादावुपन्यासः, ननु बहूनां युक्तिप्रकाशकशास्त्राणां विद्यमानत्वेन किं युक्तिप्रकाशविस्तरकरणादरेणेत्यत आह—आत्मार्थं स्वार्थं, पूर्वाण्यपि तान्येव शास्त्राण्येतत्करणादरेण विशेषात् स्मारितानि संति, स्वसंस्कारोद्बोधलक्षणं स्वार्थं साधयेयुरित्यर्थः, नन्वेतच्छास्त्रेऽध्ययनांऽगीकाराञ्यां केऽधिकारिण इत्याह—किंभूतो युक्तिप्रकाशः, जैनमंडनं, जिनशासनानुयायियुक्तीनामेवात्र प्रतिपादितत्वेन जैनाना-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मेवाऽध्ययनांगीकाराज्यामधिकारित्वान्मंमनमिव मंमनं, यद्यप्येतदध्ययनमात्रे शाक्यादयोऽधिकारिणो भवंत्येव, तथाप्यत्र तदुच्छेदकयुक्तीनां विद्यमानत्वेनाऽनधिकारिण एव शाक्यादय इत्यर्थादापन्नं, ननु श्रीमद्भिर्यो युक्तिप्रकाशविस्तरः क्रियते, स किं पूर्वं विद्यते न वेति चेत्पूर्वं विद्यते, तदा सतः पुनःकरणेन पिष्टपेषणं संपन्नं, चेन्नविद्यते तदाऽसतः करणायोग इत्युभयथाप्यत्र निरर्थकैव श्रीमतां प्रवृत्तिरिचेन्न, अस्त्येव स्याद्वादरत्नाकरादिशास्त्रेषु युक्तिप्रकाशविस्तारस्तथाप्यनया गत्या तत्र नास्तीति सार्थकैव प्रवृत्तिरत्रेति, तथाविधशास्त्रस्या अतीव गहनगंभीरा युक्तयो लालित्येन सुकरतया चात्र विस्तार्यंत इत्यर्थः, इति प्रथमवृत्तार्थः ॥ १ ॥

**मूलम्—चेद् बौद्ध वस्तु क्षणिकं मते ते, तत्साधकं मानमदस्तथैव ॥**
**तथा च तेन ह्यसता कथं तत्, प्रमेव धूमेन हुताशनस्य ॥ २ ॥**

॥ टीका—॥ अथ प्रथमं बौद्धं निराकरोति, चेद्बौद्ध० तत् सं० हे बौद्ध तव मते चेद् यदि वस्तु घटपटलकुटशकटादिकं क्षणिकं क्षणेन एकेन समयेन विनश्वरमस्तीत्यध्याहार्यान्वयः, तर्हि तत्साधकं वस्तुक्षणिकत्वसाधकं अदइदं मानमपि तथैव क्षणिकमेव स्यात्, अयं भावः—यदि सकलमपि वस्तुक्षणिकमित्येवांगीकृतं त्वया, तदा क्षणिकत्वसाधकं प्रमाणमिदमेव वाच्यं । अर्थक्रियाकारित्वात् क्षणिकं वस्त्विति, इदमपि सकलवस्त्वंतःपातित्वेन क्षणिकमेवेत्यर्थः । ननु क्षणिकत्वसाधकं प्रमाणं चेत् क्षणिकं तदा कः प्रकृते दोष इत्यत आह—तथा चेति, तथा च एवं सति क्षणिकत्वादेकसमयानंतरं असता विनष्टेन तेन क्षणिकत्वसाधकप्रमाणेन कथं तत्प्रमा क्षणिकत्वप्रमा जन्यत इत्यर्थाद् बोध्यं, प्रमा त्वत्राऽनुमितिरूपैव गृह्यते, तथा चायमर्थः—क्षणिकत्वं तावत् साध्यं, अर्थक्रियाकारित्वादिति हे-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तुः,हेतुस्तु यदि सन् स्यात्तदा पक्षधर्मत्वसामानाधिकरण्येन साध्यानुमितिं जनयति, एतस्य हेतोर्विनष्टत्वेन पक्षधर्मत्वाजावात्कथं साध्यानुमितिजनकत्वं, न कथमपीत्यर्थः । अत्र दृष्टांतमुखेन दार्ढ्यं दर्शयति । इव यथा धूमेन हेतुभूतेन हुताशनस्य वह्नेरनुमितिर्जन्यतेऽविनष्टत्वेन पक्षधर्मत्वसामानाधिकरण्यात्, न तथानेन हेतुना क्षणिकत्वात् स्वसाध्यानुमितिर्जनयितुं शक्येत्यर्थ इति वृत्तार्थः ॥ १ ॥

मूलम्—तत्संततिर्नैव पदार्थसंततेः, संग्राहिकाद्यक्षण एव नष्टा ॥
नाशग्रहौ नो युगपद् नवेतां, विरुद्धनावादिव बालवृद्धते ॥ ३ ॥

॥ टीका ॥ अथ क्षणानंतरं विनश्यता प्रमाणेन स्वसंततिर्जन्यते, तया विनश्यदवस्थार्थजनितसंततेः क्षणिकत्वं साध्यत इति चेन्नैतदपि सुंदरमित्याह—तदिति, तत्संततिः प्रमाणसंततिः पदार्थसंततेः क्षणिकत्वरूपसाध्यग्रहपुरस्कारेण न संग्राहिका सम्यग् ग्राहिका नवति, कुत इति विशेषणद्वारेण हेतुमाह—सा प्रमाणसंततिः किंविशिष्टा क आद्यक्षण एव, प्रथमक्षण एव, उत्पत्त्यनंतरं यः प्रथमः क्षणस्तस्मिन्नेव क्षणिकत्वात् क्षयंगतेत्यर्थः । नावार्थस्त्वयं—विनश्यता प्रमाणेन स्वसंततिर्जन्यते, साऽपि विनश्यती संतत्यंतरमियं किल बौद्धानां परिपाटिः । तथा च स्वनाशव्यग्रत्वात्प्रमाणसंततिरपि तथाऽवस्थापन्नार्थसंततेः कथं ग्राहिका स्यात्, नैवेत्यर्थः ॥ ननु युगपत्प्रमाणसंततेर्नाशोऽप्यस्तु, पदार्थसंततिग्रहोऽप्यस्तु, को दोष इत्यत आह—नाशश्च ग्रहश्च नाशग्रहौ, स्वस्य नाशः परस्य ग्रहः, एतौ द्वौ युगपत् ॥ ३ ॥
समकालं नो नवेतां । तथाहि—प्रमाणसंततिर्हि विनश्यती वा पदार्थसंततिग्राहिका विनष्टा वा, नाद्यो विनश्यत्यास्तस्याः स्वनाशव्यग्रत्वेन परकृत्यकरणाऽसमर्थत्वात्, विनाशकालादधिककालाऽलानाच्च । न द्वितीयस्तस्या नाशस्या-

For Private and Personal Use Only

ऽभावरूपत्वात्, अभावस्य प्रतियोगिकृत्याऽकरणात् । यद्यभावोऽपि प्रतियोगिकृत्यं करोति । तदा घटाऽभावस्यापि जलाहरणक्रियाकरणप्रसक्त्या, घटव्यतिरिक्ता अप्यर्था जलाहरणं कुर्युरिति व्यवहारोच्छेदस्तस्मादिनष्टा प्रमाणसंततिर्न पदार्थसंततिग्राहिकेति । कुत इत्यत आह-विरुद्धभावादिरुद्धत्वादित्यर्थः ॥ अथात्र दृष्टांतः ॥ इव यथा वृद्धबालते नो युगपद् भवेतां । दृष्टांते श्रूयमाणं पदं उभयत्रापि संबध्यत इति न्यायाद् वृद्धताबालते सामानाधिकरण्येनायमर्थः, एकस्मिन्नेव पुरुषे युगपद् वृद्धताबालते न संभवत इत्यर्थः । इति वृत्तार्थः ॥ ३ ॥

॥ मूलम् ॥—प्रामाण्यमुच्चैर्वदताऽपरोक्षा—नुमानयोरेव निषिद्धमेतत् ॥
शब्देषु बौद्ध त्वयका तथा चा—ऽप्रामाण्यमाप्तं तकयोर्न दृष्टं ॥ ४ ॥

॥ टीका—॥ प्रामाण्यमिति ॥—हे बौद्ध अपरोक्षानुमानयोरेव प्रत्यक्षानुमानयोरेव प्रामाण्यं वदता प्रमाणे स्त इत्युक्तं । तथा च शब्देषु त्वया एतदिति प्रामाण्यं निषिद्धं । ततः किमित्यत आह-तथा चेति, एवं सति तकयोस्तयोस्तव प्रामाण्येनाऽभिमतयोः प्रत्यक्षानुमानयोरप्रामाण्यमाप्तं प्राप्तं सदपि भवता न दृष्टं, न ददृशे, इति शब्दार्थः, भावार्थस्तु त्वया हि धावत भो डिंभाः नदीतीरे गुडशकटं विपर्यस्तमित्यादिवचनवत् संवादकत्वाऽभावात् सर्वेषां शब्दानामप्रामाण्यमित्येवं वक्तव्यं, तच्च प्रत्यक्षानुमानयोरपि समानं, क्वचिद् भ्रमरूपे प्रत्यक्षादौ संवादकत्वाऽदर्शनात्, क्वचिद्धेत्वाभासादावनुमानेऽपि संवादकत्वाऽदर्शनात्तयोः समग्रयोरपि अप्रामाण्यप्रसक्तेस्तस्मात्तयोरिव शब्दानामपि प्रामाण्यांगीकारं कुर्वित्यर्थः, इति वृत्तार्थः ॥ ४ ॥ ॥ ४ ॥

॥ मूलम् ॥—नांतर्भवत्येव किलानुमाने, शाब्दं प्रमाणं विपरीतरूपं ॥

युक्ति प्रत्यक्षवत्तस्य यतो विभिन्ना, समग्रसामग्र्यपि सुप्रतीता ॥ ५ ॥ टीका

प्र० ॥ टीका ॥— ननु शाब्दं प्रमाणं पृथग् नोच्यते, किंत्वनुमानांतःपातीत्युच्यत इति चेन्नैतदपि सुंदरमित्यत आ-
ह — नांतर्भ०, शाब्दं प्रमाणमनुमाने न अंतर्भवति, यथा प्रत्यक्षमनुमाने नांतर्भवति तथेदमपि, कुतोऽस्याऽनुमानाऽनं-
॥ ५ ॥ तर्भावे प्रत्यक्षसाम्यमित्यतो विशेषणद्वारा हेतुमाह—किंविधं शाब्दं प्रमाणं, विपरीतरूपं अनुमानाद्विपरीतं रूपं स्व-
रूपं यस्य तदिति प्रत्यक्षसाम्यं । कुतोऽस्य प्रत्यक्षस्येव नानुमानरूपत्वमित्यत आह—यतः कारणात्तस्य शाब्दप्रमा-
णस्य समग्रसामग्र्यपि अनुमानाद्विभिन्नास्तीति शब्दार्थो, भावार्थस्त्वयं—त्वया हि शाब्दं प्रमाणं किं संबद्धमर्थं ग-
मयेदसं बद्धं वा, न तावदसंबद्धं, गवादेरप्यश्वादिप्रतीतिप्रसंगात् । संबद्धं चेत्तदा तल्लिंगमेव तज्जनितं च ज्ञानमनुमा-
नमेवेति वक्तव्यं, तच्चाऽयुक्तं, प्रत्यक्षस्याप्येवमनुमानत्वप्रसंगात् । तदपि हि स्वविषये संबद्धं सत्तस्य गमकं, अन्यथा
सर्वस्य प्रमातुः सर्वार्थप्रत्यक्षत्वप्रसंगात् । अथ विषयसंबद्धत्वाविशेषेऽपि प्रत्यक्षानुमानयोः सामग्रीभेदात्प्रमाणांतरत्वं,
तर्हि शब्दस्यापि किमेवं प्रमाणांतरत्वं न स्यात्, शाब्दं हि शब्दसामग्रीतः प्रभवतीति तदुक्तं प्रमेयकमलमार्त्तण्डे—श-
ब्दाडुदेति यद्ज्ञानं, मप्रत्यक्षेऽपि वस्तुनि ॥ शाब्दं तदिति मन्यंते । प्रमाणांतरवादिनः ॥ १ ॥ तस्मात्प्रत्यक्षानुमान-
योरिव शब्दस्यापि प्रमाणांतरत्वमंगीकर्त्तव्यमेव । अथ शब्दसामग्र्या बहुसंमतत्वं दर्शयति । किंविधा सामग्री सुप्र-
तीता अतिशयेन प्रतीतेत्यर्थः ॥ ५ ॥

॥ मूलम् ॥—न संनिकर्षोऽपि भवेत्प्रमाणं, प्रमाकृतौ तद्व्यभिचारदर्शनात् ॥ ॥ ५ ॥
अप्राप्यकार्यैवक संनिकर्षो, घटादिनाऽक्ष्णेन कथं भवेत् पुनः ॥ ६ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥ टीका ॥—अथ सुगतमतमपाकृत्य नैयायिकमतमपाकरोति, न संनि० चेत्प्राप्य० द्विधाप्य० न तैज० अग्रगकाव्यगतं यौगपदमध्याहृत्यात्र व्याख्येयं ॥ हेयौग त्वया प्रमाणत्वेन कल्पितोऽपि संनिकर्षः प्रमाणं न भवेत्, कुत इति हेतुमाह ॥ प्रमाकृतौ प्रमाजनने तदिति तस्य संनिकर्षस्य व्यभिचारदर्शनात्, भावार्थस्त्वयं–प्रमासाधकतमं प्रमाणमिति प्रमाणलक्षणं त्वया अभ्युपगतं, यद्यस्मिन् सति भवत्येवाऽसति च न तत्तस्य साधकतमं, क्वचित्सत्यपि संनिकर्षे प्रमाया अनुत्पादात् । क्वचिदसत्यपि प्रमोत्पत्तेरित्यत्रान्वयव्यतिरेकाभ्यां व्यभिचारदर्शनात् । तथाहि–गगनस्य विभुत्वेन सकलमूर्त्तद्रव्यसंयोगित्वं विभुत्वमिति वचनाद् गगनचक्षुषोर्घटचक्षुषोरिव संनिकर्षेण घटविषयकप्रमाया अजननात्, न च तत्र योग्यताया अभावान्न संनिकर्षस्तत्प्रमां जनयतीति वाच्यं। योग्यतांगीकारे किमंतर्गडुना संनिकर्षेण योग्यता हि प्रतिबंधकाऽभावः, स च स्वावरणक्षयोपशमरूपं भावेंद्रियमेव, तथा चास्मत्कक्षापंजरप्रवेशः, विशेषणज्ञानाद्विशेष्यप्रमायां जायमानायां क्वचिदसत्यपि संनिकर्षे प्रमोत्पत्तेरिति स्थितमेतन्न संनिकर्षः प्रमाणमिति । अथ ग्रामो नास्ति कुतः सीमेति न्यायात् । घटाद्यर्थैः संनिकर्ष एव न संभवति, तस्य प्रमाणाऽप्रमाणत्वविचारस्तु दूरेस्त्विति दर्शयति–अप्राप्येति अप्राप्यकारि यदंबकं चक्षुस्तस्य घटादिनार्थेन संनिकर्षः कथं भवेन्न कथमपीत्यर्थः । यदि चक्षुः प्राप्यकारि स्यात् तदाऽस्यार्थप्राप्त्या संनिकर्षः संभवतीति भावार्थ इति वृत्तार्थः ॥ ६ ॥

॥ मूलम्—चेत्प्राप्यकार्यंबकमस्ति यौगा, त्यासन्नमर्थं हि कथं न पश्यति ॥
तथाविधं सत्किमु तेषु गत्वा, गृह्णाति वा यांत्यथ तेऽत्र देशे ॥ ७ ॥ ॥ ६ ॥

॥ टीका ॥—अथ चक्षुःप्राप्यकारित्वं निरस्यति । चेत्प्राप्य० चेदंबकं चक्षुः प्राप्यकारि हे यौग अस्ति, तदा-

For Private and Personal Use Only

सासन्नमंजनादिकमर्थं कथं न गृह्णातीत्यर्थः, यद्यत्प्राप्यकारि दृष्टं तदसासन्नार्थग्राहकमपि । यथा शब्दादेः श्रोत्रादि, तथा च तर्कोल्लेखः—यदि चक्षु प्राप्यकारि स्य, त्तदासासन्नार्थग्राहकमपि स्यादिति तर्कोपजीवितप्रयोगोऽपि, यथा चक्षुर्न प्राप्यकारि असासन्नार्थाऽग्राहकत्वात्, यन्नैवं तन्नैवं यथा स्पर्शनं, अथ तुष्यतु दुर्जन इति न्यायात्तावत्तवांगीकृतं चक्षुःप्राप्यकारित्वमप्यंगीक्रियते, यदि विकल्पसहं स्यात् । तथाहि—तथाविधं प्राप्यकारित्वं किमु कथं तेषु अर्थेषु गत्वा गृह्णाति, अथवा तेऽर्था अत्रदेशे चक्षुःप्रदेशे आयांतीति विकल्पद्वयमिति वृत्तार्थः ॥ ९ ॥

॥ मूलम् ॥—द्विधाप्ययुक्तं हि गतस्य तस्य, वह्न्यादिकार्थेषु कथं न दाहः ॥
नून्नूधराद्यर्थसमागमेऽपि, नाच्छादनं स्यात्किमु तस्य चक्षुषः ॥ ८ ॥

॥ टीका ॥—अथ विकल्पद्वयमध्यान्यतरविकल्पांगीकारेणाऽदक्षतां यौगस्य दर्शयति, द्विधाप्य० द्विधापि ऊन्यथापि अयुक्तं स्यान्नतु युक्तिमत्वं स्यात्तत्कथमिति तावत् प्रथमपक्षे दोषं दर्शयति यदि हि चक्षुस्तेषु गत्वा गृह्णाति तदा तस्य चक्षुषो वह्न्यादिकार्थेषु गतस्य दाहो दहनं कथं न स्यात्, अथार्थाश्चक्षुःप्रदेशे समायांतीति द्वितीयविकल्पं दूषयति, भूः पृथ्वी । भूधराः पर्वतास्तेषां चक्षुःप्रदेशे समागमे नूभूधराद्यर्था यदि चक्षुःप्रदेशे समायांति तदा किंस्यादित्यत आह—तस्य चक्षुष आच्छादनं आवरणं किमु न स्यात्, ते ह्यागताश्चक्षुराच्छादयंति, तथा च लाञ्जमिच्छतो मूलक्षतिस्तवायातीति वृत्तार्थः ॥ ८ ॥

॥ मूलम् ॥—न तैजसत्वादथ तस्य दाहो । वह्न्यादिना चेदिति नैवमेतत् ॥

न तैजसं स्यात्तमसो ग्रहाद्यत—स्तेजो न गृह्णाति च तत्कृणोति ॥ ९ ॥

॥ टीका ॥—अथेत्यादि वचश्चपेटाताडितो यौगवावदूकः किंचित्प्रतिवदति । न तैज० अथेति नन्वर्थे । ननु अस्य चक्षुषस्तैजसत्वाद्वह्न्यादिना न दाहः स्यात् । तेजो हि तेजसि गतं सद्वर्द्धते न तु हीयते, इति चेन्नैवमिति प्रतिवदंतं वावदूकं पुनर्वचश्चपेटाजिस्ताडयित्वा मौनं कारयति । एतच्चक्षुस्तैजसं न स्यात् कुत इति हेतुमाह—तमसोऽधकारस्य ग्रहाद् ग्राहकत्वादित्यर्थः, तथा च तर्कोल्लेखः—यदि चक्षुस्तैजसं स्यात्तदा तमोग्राहकं न स्यात्, यद्धि तैजसं न तत्तमोग्राहकं आलोकवत्, प्रयोगोऽपि यथा चक्षुर्न तैजसं तमो ग्राहकत्वात्, यन्नैवं तन्नैवं, यथाऽलोक इति । अत्रार्थे हेतुमाह—यतः कारणात्तेजस्तमो न गृह्णाति, प्रत्युत तमः कृणोति विनाशयति, अत्रापि तर्कोल्लेखः—यदि चक्षुस्तैजसं स्यात्तदा तमोध्वंसकं स्यात्, व्यतिरेकदृष्टांतेन प्रयोगोऽपि तथैवेति स्थितमेतन्न तैजसं चक्षुरिति, पूर्वोक्तविकल्पाऽसहत्वेन चक्षुर्न प्राप्यकारीति वृत्तार्थः ॥ ९ ॥

॥ मूलम्—बोधस्य बोधांतरवेद्यतायां, यौग त्वया नो ददृशेऽनवस्था ॥
सौवग्रहव्यग्रतया पदार्थग्रहश्च शंभोरसमग्रवित्त्वं ॥ १० ॥

॥ टीका ॥—बोधस्य० हे यौग त्वया बोधस्य ज्ञानस्य बोधांतरवेद्यतायां ज्ञानांतरवेद्यतायां स्वीकृतायामित्यध्याहार्यं, ज्ञानं ज्ञानांतरवेद्यमित्यंगीकृते त्वयाऽनवस्था न ददृशे, घटादिज्ञानं ज्ञानांतरग्राह्यं चेत्तदा ज्ञानांतरेण ग्राह्यं तदंतरेणेति, चः पुनर्दूषणाभ्युच्चये, ज्ञानस्य ज्ञानांतरवेद्यतायां घटादिविषयकज्ञानस्य सौवग्रहव्यग्रतया, स्वसंबंधा-

ग्रहः सौवग्रहस्तस्मिन् व्यग्रतया पदार्थानां ज्ञेयानामग्रहस्तथा च लाजमिल्लतो मूलक्षतिरायाता, तथाहि—पदार्थग्रहाय ज्ञानं त्वया कल्पितं तच्चेत् स्वगृहेऽप्यसमर्थं, तदा परग्राहकं कथं स्यात्। स्वग्रहे व्यग्रत्वं च शब्दबुद्धिकर्मणां त्रिक्षणावस्थायित्वेन प्रथमक्षणे स्वयमुत्पद्यते द्वितीयक्षणे ज्ञानांतरमुत्पन्नं सत् तद् गृह्णाति, तृतीयक्षणे तु गृहीतं सत्तद्विनश्यति, तया च कुतस्तेन पदार्थग्रहः, पुनर्दूषणांतरमाह—शंभोरीश्वरस्याऽसमग्रवित्त्वमसर्ववेदित्वं स्यात्तथाहि—इश्वरज्ञानस्यापि ज्ञानत्वेन ज्ञानांतरग्राह्यत्वमेव वाच्यं त्वया। तथा च तद् ज्ञानं परोक्षं स्यात्, तथा च तेन स्वयं स्वज्ञानमपि न गृहीतं, तदा तेन कथं घटादयोऽर्था गृह्यंते, अथेश्वरज्ञानं तथा नास्तीति चेत्तदाऽस्मदादीनामपि ज्ञानत्वे विशेषाऽभावात्तथा नास्तीत्यर्थस्तथा च प्रयोगः–ज्ञानं न ज्ञानांतरवेद्यं ज्ञानत्वादीश्वरज्ञानवदिति वृत्तार्थः॥

॥ मूलम् ॥—सकर्तृकत्वेऽवनिभूधरादिषु, साध्येऽत्र हेतुर्बत कार्यभावः ॥
न्यस्तस्त्वया तत्र कथं न दृष्टः, शरीरिजन्यत्वमुपाधिरेषः ॥ ११ ॥

॥ टीका ॥—सकर्तृ० चेदेक० चेतस० बतेत्यामंत्रणे हे यौग त्वयाऽवनिः पृथ्वी भूधराः पर्वतास्तदादिषु अर्थेषु सकर्तृकत्वे साध्ये कार्यभावः कार्यत्वं हेतुर्न्यस्तः, तथाहि प्रयोगः—भूभूधरादिकं सकर्तृकं कार्यत्वाद् घटवत्, यश्चात्र कर्त्ता स शंभुरेवेति। तत्र तस्मिन्ननुमाने शरीरिजन्यत्वं साध्यव्यापकसाधनाव्यापकत्वाद् व्यभिचारोन्नायकत्वाच्च कथं न त्वया एष उपाधिर्दृष्टः, अत्र एष इत्यनेन एवं ध्वन्यते। यदि व्यभिचारोन्नायकेतरः स्यादुपाधिस्तदाऽकिंचित्करत्वाददर्शनमपि स्यात्, अयमुपाधिस्तु व्यभिचारोन्नायकत्वेन व्याप्तिविघटकोऽपि कथं न दृष्टः, यदुक्तं तत्त्वचिंतामणौ—व्यभिचारोन्नयनं कुर्वन्नुपाधिर्याति दोषतामिति। तथा चायमर्थः—यत्कार्यं तच्छरीरिजन्यं कार्यत्वाद् घ-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ष्टवत्, ननु यथा घटादिकार्यस्य कर्त्ता कुलाल उपलभ्यते, तथा भूधरादिकार्याणां कः शरीरी कर्त्तास्तीति चेच्छृणु, स्वस्वकर्मसहकृताः पार्थिवादिजीवास्तत्कर्त्तारस्ते च संसारित्वेन शरीरिण एव, ननु पृथ्व्यां जीवा संतीत्यत्र किं प्रमाणमिति चेदनुमानादेव तदास्थां कुरु, सकलापि पृथ्वी जीवच्छरीरं छेद्यत्वात्तरुवत्। मनुष्यशरीरवच्चेतीश्वरस्य जगत्कर्तृतानिरासः ॥ ११ ॥

॥ १० ॥

॥ मूलम् ॥—चेदेक एवास्ति हरस्तदाऽसौ, न जीवभावं भजतेंऽतरिक्षवत् ॥
अथेश्वरश्चेत् स्ववशः कथं न, करोति लोकं सुखिनं समग्रं ॥ १२ ॥

॥ टीका ॥—अथ हर एक एवास्तीति यद्यौगा वदंति तन्निषेधायाह–चेद्यदि हर एक एवास्ति, तदासौ शंभुर्जीवभावं न भजते, न प्राप्नोति, अंतरिक्षवद् गगनवत्, यथाहि गगनं एकत्वादजीवः, तथायमपि, कथमिति चेच्छृणु, एकत्वं सजीवत्वं च तावन्न क्वचिद् दृष्टं, एकत्वं चात्र सजातीयाऽभावः, स च गगनादौ विद्यते, तस्माद्यथाऽजीवत्वे सति एकत्वं गगने विद्यते, तथात्रापि, तथा च प्रयोगः—ईश्वरोऽनात्मा एकत्वाद् गगनवत्। अथेश्वरस्य स्ववशत्वं निराकरोति। अथेत्यानंतर्यार्थे चेदीश्वरः स्ववशोऽस्ति परनिरपेक्षोऽस्तीत्यर्थः, तदा तत्तत्प्राणिगणोपार्जिततत्कर्मजन्यसुखदुःखप्रदाताऽसौ कथमंगीक्रियते, येन हि प्राक्तनं यादृशमदृष्टमर्जितं तादृशादृष्टानुसारी परमेश्वरस्तस्य तज्जनितं सुखं दुःखं वा ददातीति भवन्मतरहस्यवेदिनः। तथा च प्राणिगणोपार्ज्जितकर्मवशत्वेनास्य स्ववशत्वं कुत ॥ १० ॥
इति, अथेशस्य स्ववशत्वं यदि स्यात् तदा समग्रं लोकं कथं नासौ सुखिनं करोति, कथमिति चेच्छृणु, लोकं किल सृजन्नसौ कारुणिको अकारुणिको वा, चेदकारुणिकस्तदाऽस्य देवत्वमेव व्याहतं, म्लेच्छवन्निष्ठुरहृदयत्वात्तस्येति,

For Private and Personal Use Only

कारुणिकश्चेत्तदा स्ववशत्वे सति कारुणिकः सन् कथं न समग्रं लोकं सुखिनं करोति, कारुणिकत्वविशिष्टस्ववशत्ववतस्तथास्वभावत्वादिति वृत्तार्थः ॥ १२ ॥

॥ मूलम् ॥—चेत्सर्वगत्वं हि हरस्य मन्यसे—ऽविज्ञानविज्ञानविभक्त आत्मा ॥
मान्यस्तदीयोऽथ समग्रगत्वे, ज्ञानस्य तत्त्वं विजहाति तत्पुनः ॥ १३ ॥

॥ टीका ॥—अथ हरस्य विभुत्वं निषिध्यते. चेत्० हरस्य शंभोश्चेत्त्वं सर्वगत्वं विभुत्वं मन्यसे तदा तदीय आत्मा ईश्वरात्मा अविज्ञानविज्ञानविभक्तो मान्यः, भावार्थस्त्वयं–यदीश्वरो व्यापकस्तदा तद्गतं ज्ञानं व्यापकमव्यापकं वा, चेदव्यापकं तर्हि सिध्धांतबाधः, चेदव्यापकं तदैकस्मिन्नीश्वरात्मखंडे ज्ञानं, अपरस्मिन्नात्मखंडेऽज्ञानं, तथा चाऽविज्ञानविज्ञानाभ्यां विभक्त आत्मा तदीय इति । अथेश्वरस्य व्यापकत्वेन तद्गतं ज्ञानमपि व्यापकमेव ब्रूमः, अस्मत्सिध्धांतं वयमेव विद्मो न भवंत इति चेत्तर्हि ईश्वरज्ञानमज्ञानमेव स्यात्, तथा च प्रयोगः–ईश्वरज्ञानमज्ञानं व्यापकत्वात्, यदेवं तदेवं, यथा गगनमितीश्वरस्य सर्वगत्वनिरास इति वृत्तार्थः ॥ १३ ॥

॥ मूलम् ॥—चिच्छक्तिसंक्रांतिवशेन बुद्धि–र्जडापि सांख्यस्य तवाऽजडेव ॥
आभासते यन्न च युक्तमेत—च्चिच्छक्तिराप्नोति न संक्रमं यतः ॥ १४ ॥

॥ टीका ॥—अथ सांख्यमतं निराकरोति, चिच्छक्ति० अहो पुरुष सांख्य तव मते जडापि बुद्धिश्चिच्छक्तिसंक्रांतिवशेनाऽजडेवाभासते, अयमर्थः–बुद्धिर्जडत्वेन न स्वपरप्रकाशिकाऽस्ति, यदा चैतस्यां चिच्छक्तेः संक्रमः स्यात्तदा



For Private and Personal Use Only

प्रकाशिकाऽपि स्यादित्यजस्रैव तत्राभासते, न चैतद्युक्तं, कुत इत्याह यतः कारणात् चिच्छक्तिः संक्रमं नाप्नोति कथमिति चेच्छृणु, संक्रमस्तावन्मूर्त्तधर्मश्चिच्छक्तेरमूर्त्तधर्मत्वात् संक्रमो नोत्पद्यत इति वृत्तार्थः ॥ १४ ॥

॥ मूलम् ॥—तस्या अथो संभवनेऽपि बुद्धि-र्जडत्वतो न क्रियते सचेतना ॥
सचेतनस्यापि नरस्य संक्रमात्, यद्दर्पणो नैव भवेत् सचेतनः ॥ १५ ॥

॥ टीका ॥—तस्या० अथ तुष्यतु दुर्जन इति न्यायात्तत्र संतोषायैवमुच्यते, अथो अथानंतरं तस्याश्चिच्छक्तिसंक्रांतेः कथंचित् संभवनेऽपि संभवेऽपि जडा सती बुद्धिः, सचेतना नैव क्रियते, कुत इत्याह—यत्कारणात् सचेतनस्यापि नरस्य दर्पणे संक्रमात् दर्पणः सचेतनो न स्यात्, दर्पणस्य सचेतनाऽचेतनसंक्रमावसरे तुल्यत्वादिति वृत्तार्थः ॥ १५ ॥

॥ मूलम्—यदि स्तः प्रकृतेरेव, बंधमोक्षौ तदा ध्रुवम् ॥
वंध्याजस्येव जीवस्या, ऽवस्तुत्वं न भवेत्कथं ॥ १६ ॥

॥ टीका ॥—यदिस्त० भो सांख्य यदि प्रकृतेरेव बंधमोक्षौ स्तः, तदा ध्रुवं निश्चितं वंध्याजस्येव वंध्यासुतस्येव जीवस्यात्मनोऽवस्तुत्वं कथं न भवेदपि तु भवेदित्यर्थः, कथमिति चेच्छृणु, यथाहि वंध्यासुतस्यार्थक्रियाकारित्वाऽभावात् अवस्तुत्वं, तथा जीवस्याऽर्थक्रियाकारित्वाऽभावादवस्तुत्वं, तथाहि—जीवस्यार्थक्रिया बंधो मोक्षश्च, तौ च तस्य तव मते न स्त इति वंध्यासुतसदृश आत्मा स्यादिति वृत्तार्थः ॥ १६ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





॥ मूलम् ॥—न स्तश्चेदात्मनो बंध–मोक्षौ तर्हि कथं त्वया ॥
भोगीति मन्यते बद्धं, प्रकृत्या भोगमस्ति यत् ॥ १७ ॥

॥ टीका ॥—नस्तश्चे० चेद् बंधमोक्षौ आत्मनो न स्तस्तर्हि आत्मा भोगीति त्वया कथं मन्यते, भोगो हि शुभाऽशुभकर्मबंधजनितः, स चास्य नास्तीति न भोगित्वव्यपदेशो युक्तः, तथा च प्रकृतेरेव त्वया भोगित्वं वाच्यं, कुत इत्याह—यत्कारणात् भोग्यं कर्म प्रकृत्यैव बद्धं, नान्येनेति वृत्तार्थः ॥ १७ ॥

॥ मूलम्—स्वयं च विहितं कृत्यं, स्वयं भोक्तव्यमेव भोः ॥
दृश्यते ह्यत्र लोकेऽपि, तद्भोगस्तस्करादिषु ॥ १८ ॥

॥ टीका ॥—अथ मंत्रिणैवान्येन कृतं राज्ञे वान्येन भुज्यमानमपि दृश्यत इति मंत्रिस्थानीयप्रकृत्या बद्धं आत्मना भुज्यमानमस्तीत्यत आह स्वयंच०, भो सांख्य स्वयं विहितं कृत्यं स्वयमेव भोक्तव्यं, नाऽपरेण, हि यतः कारणाल्लोकेऽपि तद्भोगः स्वयंकृतभोगः स्वस्यैव तस्करादिषु दृश्यते, येनैव हि तस्करेण चौर्यं कृतं, तस्यैव तस्करस्य शूलारोपणादि क्रियमाणमस्ति, नापरस्येति, मंत्रिदृष्टांतस्त्वत्राऽसत्य एवेति, न हि सर्वमपि मंत्रिणा कृतं राजा भुनक्ति, यच्च किंचिद् भुनक्ति तत्तु तेन मंत्रिणा करणभूतेन निर्मितत्वात्, तथा चास्मन्मतमेव सुस्थं, करणभूतैः कर्मभिः कृतं जीवो भुनक्तीति वृत्तार्थः ॥ १८ ॥ ॥ १३ ॥

॥ मूलम्—एकांतनित्यं गगनादिवस्तु, स्वभावभेदात्किमु कार्यकारि ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्वभावभेदस्तु न तत्र चेद् भवेद्—भवेत्तदा तज्जनितार्थसंकरः ॥ १९ ॥

॥ टीका ॥—अथ सांख्यमतं निरस्य वैशेषिकमतं निराकरोति । एकांत० अहो वैशेषिक गगनादि गगनकालदिगात्मादिकं वस्तु एकांतनित्यं सत् स्वभावभेदाद् भिन्नस्वभावकत्वात्कार्यकारि किमु कथं भवति, न कथमपीति, भावार्थस्त्वयं—यदि गगनादि वस्तु नित्यं तदा कथं स्वभावभेदः संभवति, अप्रच्युताऽनुत्पन्नस्थिरैकस्वभावं हि नित्यं, गगनादिकं हि येनैव स्वभावेन तव मते प्रथमं शब्दादिकं जनयति, न तेनैव स्वभावेन द्वितीयं शब्दादिकं जनयति, एवमात्मादिना सुखदुःखादिजननेऽप्यवसेयं, न हि येनैव स्वभावेनात्मा सुखं जनयति तेनैव स्वभावेन दुःखमपीति, तथा च स्वभावभेदात् स्वभाववतोऽपि भेद इति, ननु स्वभावभेदो मास्तु, एक स्वभावेनैव गगनादिवस्तुकार्यकारि भविष्यतीत्याशंक्याह—चेद्यदि तत्र गगनादिवस्तुनि कार्यजननाऽवसरे स्वभावभेदो न भवेत्तदा तदिति गगनादिना क्रमेण जनितार्थानां संकरः स्यात्, कथमिति चेच्छृणु, येनैव स्वभावेन प्रथमं शब्दं जनयति गगनं, तेनैव स्वभावेन द्वितीयतृतीयचतुर्थशब्दान् जनयति, समवायिकारणस्वभावभेदात्तदुत्थकार्यस्याप्यभेद एकस्वभावजन्यत्वात् । न ह्येकस्वभावेन मृदा जनिते एकस्मिन्नेव घटे भेद उपलभ्यते, द्वितीयघटे तु स्वभावभेदेन मृदा जनितत्वाल्लभ्यतेऽपि भेदः एवं चात्माऽपि एकस्वभावत्वात् येनैव स्वभावेन सुखं जनयति तेनैव स्वभावेन दुःखमपि, तथा चैकस्वभावत्वात् सुखदुःखसांकर्यं स्यात्तथा च महती भवतो हानिर्लोकव्यवहारलोपात्, एवं कालादिष्वपि नेयमिति, तस्मान्न तद् गगनादि एकांतनित्यं स्यादिति वृत्तार्थः ॥ १९ ॥ ॥ १४ ॥

॥ मूलम्—न सर्वथाऽनित्यतया प्रदीपा—दिकस्य नाशः परमाणुनाशात् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रदीपतेजःपरमाणवोऽमी, आसादयंत्येव तमोऽणुभावं ॥ १० ॥ 

॥ टीका ॥—अथार्थस्य सर्वथाऽनिस्तनं निराकरोति, न सर्व० हे वैशेषिक प्रदीपादिकस्यार्थस्य सर्वथाऽनिस्तनया नाशो न स्यात्, कुत इत्याह परमाणुनाशात्, यदि प्रदीपस्य सर्वथाऽनिस्ततया सर्वथा नाशोऽङ्गीक्रियते, तदा तदारंभकपरमाणूनामपि नाशः स्यात्, एतच्च भवताप्यनिष्टं, ननु पूर्वं दृश्यमाणप्रदीपाऽदर्शने को हेतुरस्ति आह—तदिति स चासौ दीपश्च तद्दीपस्तस्मिन् ये तेजःसंबंधिपरमाणवः अमी इति भवत्सम्मताः तमोरूपतया परिणता दृश्यंते, न पूर्वदृश्यमाणप्रदीपा दृश्यंत इति तददर्शनेऽयमेव हेतुरिति वृत्तार्थः ॥ १० ॥

॥ मूलम् ॥—द्रव्यं तमो यद् घटवत् स्वतंत्र—तया प्रतीतेरथरूपवत्त्वात् ॥
नाऽभावरूपं प्रतियोगिनोऽपि, तथा स्वरूपं किल केन वार्यं ॥ ११ ॥

॥ टीका ॥—ननु तमसोऽभावरूपत्वेन कथं परमाणुजन्यत्वमस्ति आह द्रव्यंत० हे वैशेषिक तमो द्रव्यं कुत इत्याह—स्वतंत्रतया प्रतीतेः, यत् स्वातंत्र्येण परनिरपेक्षतया प्रतीयते तद् द्रव्यं, घट इवेति । अथेति द्वितीयहेत्वर्थे रूपवत्त्वात्तद्द्रव्यं घटवदिति । अथाऽभावरूपत्वे दोषमाह तमो नाऽभावरूपं, कुत इत्याह—प्रतियोगीति, तमसोऽभावरूपत्वे प्रतियोगी तावदालोको वक्ष्यते भवता, अस्माभिस्तु वक्ष्यते तमएव प्रतियोगी, तस्याऽभावस्तु आलोक ॥१५॥
इति, तथा च भवता प्रोच्यमानप्रतियोगिनोऽपि तथा स्वरूपं केन वार्यं, न केनापीत्यर्थः, इति तमसो द्रव्यत्वात्परमाणुजन्यत्वमिति वृत्तार्थः ॥ ११ ॥

For Private and Personal Use Only

॥ मूलम् ॥—काणाद शब्दस्तव चेन्नभोगुणो—ऽनातींद्रियः स्यात्परिमाणवत्कथं ॥
गुणोऽपि चेत्तर्हि तदाश्रये च, द्रव्येऽगृहीते किमु गृह्यतेऽसौ ॥ २२ ॥

॥ टीका ॥—अथ शब्दस्य गुणत्वं निषेधयति । काणाद० हे काणाद तव मते चेन्नभोगुणः शब्दोऽस्ति, तदाऽतींद्रिय इंद्रियाऽग्राह्यः कथं न स्यात् परिमाणवत् । अधिकाराद् गगनपरिमाणमिव, यथा गगनपरिमाणं तद्गुणत्वेनाऽतींद्रियं तथा शब्दो भवेदिति, तस्मान्न गगनगुणः शब्दः, ननु शब्दस्य गगनगुणत्वं मास्तु तथाऽपि कस्यचिद् द्रव्यांतरस्य गुणोऽयं भविष्यतीति वैशेषिककदाशां निराकरोति. चेत् शब्दो गुणस्तर्हि तदाश्रये द्रव्येऽगृहीतेऽसौ कथं गृह्यते, तस्मान्नायं गुणोऽपीति वृत्तार्थः ॥ २२ ॥

॥ मूलम् ॥—द्रव्यं हि शब्दो गतियुक्तभावाद्, व्याघातकत्वाच्च गुणान्वितत्वात् ॥
अर्थक्रियाकारितया च किंचा—नुद्भूतरूपादिगुणान्वितोऽसौ ॥ २३ ॥

॥ टीका ॥—अथ शब्दस्य गुणत्वं निरस्य स्वमतसिद्धं द्रव्यत्वं दर्शयति, द्रव्यं हि० ॥ शब्दो द्रव्यं, कुत इत्याह—गतियुक्तभावाद् गतिमत्त्वादित्यर्थः, गतिर्हि द्रव्य एव दृष्टा न पुनर्गुणादिषु, द्रव्यत्वे हेतुमाह—व्याघातकत्वात् यद् व्याघातकं तद् द्रव्यमेव दृष्टं, यथा कुड्यादि, गुणादीनां व्याघातकत्वाऽसंभवात्, दृश्यते च तीव्रशब्दैर्मंदशब्दानां व्याघातकरणमिति । पुनर्द्रव्यत्वे हेत्वंतरमाह—गुणान्वितत्वात्, गुणाः संख्यादयस्तैरन्वितत्वात् । एको द्वौ त्रयो वा शब्दा मया श्रुता इत्यबाधितप्रतीतेर्जायमानत्वात् । अथ पुनस्तस्य द्रव्यत्वे हेतुमाह—अर्थक्रियाकारि-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तथा, यदर्थक्रियाकारि तद् द्रव्यं, यथा घट इति, ननु नीलरूपस्य गुणत्वेऽपि नयनतेजोवृद्धिजनकत्वेनार्थक्रियाकारित्वाद् व्यभिचार इति चेन्न । न हि नीलं रूपं नयनतेजःप्रवर्द्धकं, किं तु तदाश्रयद्रव्यमेव । तथाहि नीलरूपाश्रये द्रव्ये गृहीते तद्गृहीतुं शक्यते, तयोश्च सर्वथा भेदाऽभावेन युगपद् ग्रहात्, नीलरूपविशिष्टं द्रव्यं गृहीतं सन्नयनतेजःप्रवर्द्धकमिति स्थितमेतत् ननु शब्दश्चेद् घटवद् द्रव्यं तर्हि तस्मिन्निव तत्र कथं रूपादिगुणा नोपलभ्यंत इत्याशंक्याह—किंचेति, आकाशगुणनिराकरणार्थं असौ शब्दोऽनुद्भूतरूपादिगुणान्वितो भवति, अत्र हि रूपादिगुणास्तु संत्येव, परमनुद्भूता इति नो दृश्यंते, वायाविव, ननु कस्तावद्वायावनुद्भूतगुण इति चेच्छृणु, रूपादिरेव, ननु वायौ रूपमेव नास्ति, अनुद्भूतत्वं तत्र तस्य कुत इति चेन्न, स्पर्शेन वायोरूपस्य साधितत्वात्, तथा हि प्रयोगः—वायू रूपवान् स्पर्शवत्त्वात्, यस्तथा स तथेति, वायुवत् शब्दोऽप्यनुद्भूतरूपवानिति वृत्तार्थः ॥ २३ ॥

**॥ मूलम् ॥—नभः प्रदेशश्रेणिष्वा–दित्योदयवशाद् दिशां ॥**
**पूर्वादिको व्यवहारो, व्योम्नो भिन्ना न दिक्ततः ॥ २४ ॥**

टीका—अथ वैशेषिकमतसिद्धदिगाकाशयो र्भेदं निराकरोति । नभःप्र०॥ हे वैशेषिक त्वया यतः पूर्वादिदशप्रत्यया जायते सा दिक्, गगनाद्भिन्नेति निगद्यते, तच्चाऽनुपपन्नं, दशप्रत्ययानां गगनादेव जायमानत्वादिति दर्शयति, नभःप्रदेशश्रेणिषु आकाशप्रदेशश्रेणिषु आदित्यस्य भानोरुदयवशात् पूर्वादिको व्यवहारो व्यवहृतिर्जायते, अयमर्थः—येषु नभःप्रदेशेषु सूर्य उदेति ते नभःप्रदेशाः पूर्वदिक्त्वव्यवहारजनकास्त एव नभःप्रदेशाः पूर्वदिगित्युच्यते, शेषासु नवस्वप्यनयैव रीत्या योज्यं, ततः कारणात् व्योम्नो दिक् न भिन्ना, व्योमप्रदेशानामेव दिक्त्वादिति वृ-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्यार्थः ॥ १४ ॥

॥ मूलम्—आत्मा महापरिमाणा—धिकरणं न संभवी ॥
असाधारणसामान्य—वत्त्वेऽनेकत्वतः सति ॥ १५ ॥

॥ टीका ॥—अथात्मनः परमतसिद्धं महापरिमाणाधिकरणत्वं निषेधयति । आत्माम० । हे वैशेषिक आत्मा महापरिमाणाधिकरणं न संभवी, यथा गगनं महापरिमाणाधिकरणं संभवति न तथात्मा संभवति, कुत इत्याह अ साधारणसामान्यवत्त्वे सत्यनेकत्वतः अनेकत्वादित्यर्थः । अनेकत्वादित्युक्ते सत्तादिसामान्येषु व्यभिचारः, अत उक्तं —सामान्यवत्त्वे सति तथा चाकाशकालादिषु व्यभिचारः, नत्वाकाशादीनामनेकत्वं, कुतस्तेषामेकत्वादितिचेन्न । घटा-द्युपाधिभेदात्तेषामनेकत्वमिति तेषु व्यभिचारस्तन्निरासायाऽसाधारणसामान्यवत्त्वे सतीति तेषु असाधारणसामान्य-माकाशत्वकालत्वादिकं न संभवति, तच्च भवताऽपि सामान्यत्वेन नांगीकृतमिति, दृष्टांतश्चात्र घट एव, घटे ह्यनयो-र्हेतुसाध्ययोः प्रवर्त्तमानात्, एवमनेकयुक्तय आत्मनो विभुत्वनिषेधिकास्संति, ताश्चातीवग्रंथगौरवभयान्नोच्यंत इति वृत्तार्थः ॥ १५ ॥

॥ मूलम् ॥—नास्त्यात्मनश्चेत्तव सक्रियत्वं, देशांतरे चेह भवांतरे वा ॥ ॥ १८ ॥
गतिःकथं तर्हि भवेत्तथा च, वायोरिवास्मान्न विभुत्वमस्य ॥ १६ ॥

॥ टीका—नास्त्या० ॥ हे वैशेषिक तव मते चेद्यदि आत्मनः सक्रियत्वं नास्ति तर्हि देशांतरे वा भवांतरे वा-

For Private and Personal Use Only

त्मनः कथं गतिर्भवति, यद्यात्मनः सक्रियत्वं नेष्यते तर्हि तस्य परलोकगतिर्वा न स्यात्, तथा च तव नास्तिकादप्या-धिक्यं, नास्तिकेन हि तस्य परलोकगतिर्न स्वीक्रियते, देशांतरगतिस्त्वध्यक्षसिद्धा स्वीक्रियते एव, त्वं तु तामपि निषेधयसीत्यर्थः । तस्मादात्मनः सक्रियत्वादिति हेतोरस्यात्मनो विभुत्वं वायोरिव न स्यात् । तथा च प्रयोगः—आत्मा न विभुः सक्रियत्वाद्वायुवदिति वृत्तार्थः ॥ १६ ॥

॥ १९ ॥

॥ मूलम् ॥—जीवेऽत्र मध्यं परिमाणमस्त्य—विभुत्वतः कुंभ इवावदातं ॥
पर्यायनाशादथ पिंडभावा—न्नानित्यता नापि च नित्यतास्मिन् ॥२७॥

॥ टीका ॥—अथ विभुत्वे सिद्धे सति मध्यमपरिमाणाधिकरणत्वमात्मनो दर्शयति, जीवेऽत्र०, अत्र जीवेऽस्मिन्नात्मनि अस्मिन्नित्युक्ते केवलिसमुद्घातावस्थापन्नात्मनिरासः, मध्यं विभुत्वाणुत्वविकलं परिमाणमस्तीति साध्यवत्पक्षनिर्देशः, कुत इत्याह—अविभुत्वतः कुंभइव घटइव, यथा कुंभे घटे विभुत्वाऽभावान्मध्यपरिमाणमस्तीति भावः, अवदातं स्पष्टं यथा स्यात्तथा, ननु तस्मिन्नात्मनि किं नित्यतोच्यते, उताऽनित्यतेत्याशंक्याह, पर्याय०, पर्यायाणामात्मसंबंधिनां देवनारकतिर्यक्त्वादीनां नाशाद् ध्वंसान्न नित्यता, पिंडभावात् द्रव्यतः सत्वेन, ध्वंसाऽप्रतियोगित्वान्नानित्यताऽपि, तस्मादात्मनि नित्याऽनित्यता चात्राऽभ्युपगंतव्या, तथा च न कश्चिद्दोषः, इति वृत्तार्थः ॥ १७ ॥

॥ १९ ॥

॥ मूलम् ॥—इति स्फुरद्वाचकधर्मसागर—क्रमाब्जभृंगः कविपद्मसागरः ॥
युक्तिप्रकाशं स्वपरोपकारं । कर्त्तुं चकारार्हतशासनस्थः ॥ १८ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





टीका—अथ ग्रंथोपसंहारार्थमाह, इति स्फु० सुकरमेवेदं वृत्तमिति

॥ इति श्रीयुक्तिप्रकाशविवरणं भट्टारकघटाकोटिकोटीरश्रीहीरविजयसूरीश्वरविजयराज्ये महोपाध्यायश्रीधर्मसागरगणिशिष्य पं० पद्मसागरगणिविरचितं संपूर्णम् ॥ ग्रंथाग्रंथ ३०० ॥

॥ इति श्रीयुक्तिप्रकाशविवरणं समाप्तं ॥



For Private and Personal Use Only

# ॥ अथ श्रीस्याद्वादकलिका ॥

## ( कर्ता श्रीराजशेखरसूरिः )

॥ षड्द्रव्यज्ञं जिनं नत्वा । स्याद्वादं वच्मि तत्र सः ॥ ज्ञानदर्शनतो भेदाऽ–भेदाभ्यां परमात्मसु ॥ १ ॥ सि-
सृक्षा संजिहीर्षा च । स्वभावद्वितयं पृथक् ॥ कूटस्थनित्ये श्रीकंठे । कथं संगतिमंगति ॥ २ ॥ गुणश्रुतित्रयोर्व्यादि–
रूपतापि महेशितुः ॥ स्थित्यैकरूपताख्याने । वर्ण्यमाना न शोभते ॥ ३ ॥ मीनादिष्ववतारेषु । पृथग्वर्णाककर्मताः॥
विष्णोर्नित्यैकरूपत्वे । कथं श्रद्दधति द्विजाः ॥ ४ ॥ शक्तेः स्युरंबिका वामा । ज्येष्टा रौद्रीति चाभिधाः॥ दशाभेदेन
शाक्तेषु । परावर्त्तं विना न ताः ॥ ५ । चित्तो निरन्वये नाशे । कथं जन्मांतरस्मृतिः ॥ ताथागतमते न्याय्या । न च
नास्त्येव सा यतः ॥ ६ ॥ इत एकनवते कल्पे । शक्त्या मे पुरुषो हतः ॥ तेन कर्मविपाकेन । पादे विद्धोऽस्मि भिक्षवः
॥ ७ ॥ सुखदुःखनृदेवादि–पर्यायेभ्यो भवांगिषु ॥ गतिस्थित्यन्यान्यवर्णा—दिधर्मेभ्यः परमाणुषु ॥ ८ ॥ वर्णगंधर-
सस्पर्शै–स्तैस्तैर्भिन्नाक्षगोचरैः ॥ स्यात्तादात्म्यस्थितैः स्कंधे–ष्वनेकांतः प्रघुष्यतां ॥ ९ ॥ प्रतिघातशक्तियोगा—च्छब्दे
पौद्गलिकत्ववित् ॥ भेदैस्तारतरत्वाद्यैः. स्याद्वादं साधयेद् बुधः ॥ १० ॥ तर्कव्याकरणागम–शब्दार्थालंकृतिध्वनिच्छंदः॥
एकत्रपादवाक्यो । दृष्टविभागं युतं सर्वं ॥ ११ ॥ स्वरादिवर्णस्यैकस्य । संज्ञास्तास्ताः स्वकार्यगाः ॥ शब्दे लिंगादि-
नानात्वं । स्याद्वादे साधनान्यहो ॥ १२ ॥ सादित्वान्नाशित्वा—दालोकतमोभिधानराशियुगात् ॥ निजसामग्र्योत्पा-
दा—दालोकाभावना तमश्छाये ॥ १३ ॥ ( समाहारैकत्वात्तमश्छाययोरित्यर्थः ) चाक्षुषभावाद्रसवीर्य—पाकतो ङ-

व्यतास्त्वनेकांतः ॥ परिणामविचित्रत्वा—दत्राप्यालोकवत्सिद्धः ॥ १४ ॥ उपघातानुग्रहकृति—कर्मणि पौद्गलिकता
विषपयोवत् ॥ तत्तत्परिणतिवशत—स्तत्रोत्पादव्ययध्रुवता ॥ १५ ॥ मैत्राद्यैर्मुज्जनकं । कामक्रोधादिभिः प्रयासकरं ॥
परमाणुमयं चित्तं । परिणतिचैव्यात्रिकात्मकता ॥ १६ ॥ धर्माधर्मलोकखानां । तैस्तैः पुद्गलजंतुभिः ॥ स्याद्
॥ ११ ॥ संयोगविभागाभ्यां । स्याद्वादे कस्य संशयः ॥ १७ ॥ अलोकपुष्करस्यापि । त्रिसंवलिततां मुणेद् ॥ तत्तत्सं
योगविभाग—शक्तियुक्तत्वचैव्यतः ॥ १८ ॥ व्यावहारिककालस्य । मुख्यकालस्य चास्तु सा ॥ तत्तद्भावपरा-
वर्त्त—स्वभावबहुलत्वतः ॥ १९ ॥ एककर्तृकयोः पूर्व—काले कामसयः स्थितः ॥ स एव नित्यानित्यत्वं । ब्रूतेऽर्थे
चितयास्तु नः ॥ २० ॥ पीयमानं मदयति । मध्वित्यादि द्विगं पदं ॥ स्याद्वादभेरीभांकारै—र्मुखरीकुरुते दिशः
॥२१॥ अनवस्थासंशीति—व्यतिकरसंकरविरोधमुख्या ये ॥ दोषाः परैः प्रकटिताः। स्याद्वादे ते तु न सजेयुः ॥२२॥
नित्यमनित्यं युगलं ॥ स्वतंत्रमित्यादयस्त्रयो दुष्याः ॥ तुर्यः पक्षः शबलद्वयी—मयो दुष्यते केन ॥ २३ ॥ एकत्रोपाधि-
भेदेन । बौद्धा द्वंद्वं क्षणे क्षणे ॥ न विरुद्धं रूपरस—स्थूलास्थूलादिधर्मवत् ॥ २४ ॥ विनाशः पूर्वरूपेणो—त्पादो
रूपेण केनचित् ॥ ऽन्यरूपेण च स्थैर्य—मनेकांतस्य जीवितं ॥ २५ ॥ द्रव्यक्षेत्रकालभावैः । स्वैः सत्वमपरैः परं ॥
भेदाभेदानित्यनित्यं । पर्यायद्रव्यनो वदेत् ॥ २६ ॥ अंशापेक्षमनेकत्व—मेकत्वं त्वंशयपेक्षया ॥ प्रमाणनयभंग्या चा—
नभिलाप्याभिलाप्यते ॥ २७ ॥ विजातीयास्स्वजातीया—द्व्यावृत्तेरनुवृत्तितः ॥ व्यक्तिजाती भणेन्मिश्रे । एकांते ॥ ११ ॥
दूषणे क्षणात् ॥ २८ ॥ नान्वयः सहिभेदित्वा—न्न भेदोऽन्वयवृत्तितः ॥ मृद्भेदद्वयसंसर्ग—वृत्तिजात्यंतरं घटः ॥२९॥
भागे सिंहो नरो भागे । योऽर्थो भागद्वयात्मकः ॥ तमभागं विभागेन । नरसिंहं प्रचक्षते ॥ ३० ॥ नरसिंहरूपत्वा

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



—न्न सिंहोनररूपतः ॥ शब्दविज्ञानकार्याणां । भेदाज्जात्यंतरं हि सः ॥ ३१ ॥ घटमौलि ( ४ ) सुवर्णार्थी । नाशो-
त्पादस्थितिष्वयं । शोकप्रमोदमाध्यस्थ्यं । जनो याति सहेतुकं ॥ ३२ ॥ पयोव्रतो न दध्यत्ति । न पयोऽत्ति दधि-
व्रतः ॥ अगोरसव्रतो नोभे । तस्माद्वस्तुत्रयात्मकं ॥ ३३ ॥ ( अवोचाम च जिनस्तुतौ ) जन्यत्वं जनकत्वं च । कृण-
स्यैकस्य जल्पता ॥ बौद्धेन युक्त्या मुक्तीश । तवैवांगीकृतं मतं ॥ ३४ ॥ प्रमाणस्यापि फलतां । फलस्यापि प्रमाण-
तां ॥ वदद्भ्यां कणभक्षाक्ष-पादाभ्यां त्वन्मतं मतं ॥ ३५ ॥ एकस्यां प्रकृतौ धर्मौ । प्रवर्त्तननिवर्त्तने ॥ स्वीकृत्य क-
पिलाचार्या—स्त्वदाज्ञामेव बिभ्रिर ॥३६॥ अनर्थक्रियाकारित्व—मवस्तुत्वं च तत्कृतं ॥ एकांतनित्यानित्यादौ । जल्पेन्मिश्रे
त्वदोषतां ॥ ३ . ॥ आत्मानमात्मना वेत्ति । स्वेन स्वं वेष्टयत्यहिः ॥ संबंधा बहवश्चैक—त्रेति स्याद्वाददीपकाः ॥३८॥
वैद्यकज्योतिषाध्यात्मा—दिषु शास्त्रेषु बुद्धिमान् ॥ विष्वग् पश्यत्यनेकांतं । वस्तूनां परिणामतः ॥ ३९ ॥ द्रव्यषट्-
केऽप्यनेकांत—प्रकाशाय विपश्चितां ॥ प्रयोगान् दर्शयामास । सूरिः श्रीराजशेखरः ॥ ४० ॥

---

## ॥ इति श्री स्याद्वादकलिका समाप्ता ॥



For Private and Personal Use Only

# ॥ अथ श्रीहरिभद्रसूरिकृतान्यष्टकानि लिख्यंते. ।

## ॥ अथ प्रथमाष्टकं ॥

॥ यस्य संक्लेशजननो, रागो नास्त्येव सर्वथा ॥ नच द्वेषोऽपि सत्त्वेषु, शमेंधनदवानलः ॥ १ ॥ नच मोहोऽपि सज्ज्ञान-छादनोऽशुद्धवृत्तकृत् ॥ त्रिलोकख्यातमहिमा, महादेवः स उच्यते ॥ २ ॥ युग्मम् ॥ यो वीतरागः सर्वज्ञो, यः शाश्वतसुखेश्वरः ॥ क्लिष्टकर्मकलातीतः, सर्वथा निष्कलस्तथा ॥ ३ ॥ यः पूज्यः सर्वदेवानां, यो ध्येयः सर्वयोगिनाम् ॥ यः स्रष्टा सर्वनीतीनां, महादेवः स उच्यते ॥ ४ ॥ युग्मम् ॥ एवं सद्वृत्तयुक्तेन, येन शास्त्रमुदाहृतम् ॥ शिववर्त्म परं ज्योति. स्त्रिकोटीदोषवर्जितम् ॥ ५ ॥ यस्य चाराधनोपायः, सदाज्ञाभ्यास एव हि ॥ यथाशक्तिविधानेन, नियमात्स फलप्रदः ॥ ६ ॥ सुवैद्यवचनाद्यद्वद्, व्याधेर्भवति संक्षयः ॥ तद्वदेव हि तद्वाक्याद्, ध्रुवः संसारसंक्षयः ॥ ७ ॥ एवं भूताय शांताय, कृतकृत्याय धीमते ॥ महादेवाय सततं, सम्यग् भक्त्या नमोनमः ॥ ८ ॥

## ॥ अथ द्वितीयाष्टकं ॥

॥ द्रव्यतो भावतश्चैव, द्विधा स्नानमुदाहृतम् ॥ बाह्यमाध्यात्मिकं चेति, तदन्यैः परिकीर्त्यते ॥ १ ॥ जलेन देहदेशस्य, क्षणं यच्छुद्धिकारणम् ॥ प्रायोऽन्यानुपरोधेन, द्रव्यस्नानं तदुच्यते ॥ २ ॥ कृत्वेदं यो विधानेन, देवतातिथिपूजनम् ॥ करोति मलिनारंभी, तस्यैतदपि शोभनम् ॥ ३ ॥ भावशुद्धिनिमित्तत्वा-त्तथानुभवसिद्धितः ॥ कथंचिद्दोषभावेऽपि, तदन्यगुणभावतः ॥ ४ ॥ अधिकारिवशाच्छास्त्रे, धर्मसाधनसंस्थितिः ॥ व्याधिप्रतिक्रियातुल्या, विज्ञे-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir
For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



या गुणदोषयोः ॥ ५ ॥ ध्यानांजसा तु जीवस्य, सदा यच्छुद्धिकारणम् ॥ मलं कर्म समाश्रित्य, जावस्नानं तडुच्यते ॥ ६ ॥ ऋषीणामुत्तमं ह्येतत्, निर्दिष्टं परमर्षिजिः ॥ हिंसादोषनिवृत्तानां, वृत्तशीलविवर्धनम् ॥७॥ स्नात्वाऽनेन यथा-योगं, निःशेषमलवर्जितः ॥ जूयो न लिप्यते तेन, स्नातकः परमार्थतः ॥ ८ ॥



## ॥ अथ तृतीयाष्टकं ॥

॥ अष्टपुष्पी समाख्याता, स्वर्गमोक्षप्रसाधनी ॥ अशुद्धेतरजेदेन, द्विधा तत्वार्थदर्शिजिः ॥ १ ॥ शुद्धागमैर्यथा-लाजं, प्रत्यग्रैः शुचिजाजनैः ॥ स्तोकैर्वा बहुजिर्वापि, पुष्पैर्जात्यादिसंजवैः ॥ २ ॥ अष्टापायविनिर्मुक्त, स्तडुत्थगुण-भूतये ॥ दीयते देवदेवाय, या सा शुद्धेत्युदाहृता ॥ ३ ॥ संकीर्णेषा स्वरूपेण, इव्यादुजावप्रसक्तितः ॥ पुण्यबंधनि-मित्तत्वाद्, विज्ञेया स्वर्गसाधनी ॥ ४ ॥ या पुनर्जावजैः पुष्पैः, शास्त्रोक्तिगुणसंगतैः ॥ परिपूर्णत्वतोऽम्लानै, रत एव सुगंधिजिः ॥ ५ ॥ अहिंसा सत्यमस्तेयं, ब्रह्मचर्यमसंगता ॥ गुरुजक्तिस्तपो ज्ञानं, सत्पुष्पाणि चचक्षते ॥ ६ । एजि-र्देवाधिदेवाय, बहुमानपुरस्सरा ॥ दीयते पालनाद्यातु, सा वै शुद्धेत्युदाहृता ॥ ७ ॥ प्रशस्तो ह्यनया जाव, स्ततः कर्म-क्षयो ध्रुवः ॥ कर्मक्षयाच्च निर्वाण, मत एषा सतां मता ॥ ८ ॥

## ॥ अथ चतुर्थाष्टकं. ॥

॥ कर्मेंधनं समाश्रित्य, दृढा सद्भावनाहुतिः ॥ धर्मध्यानाग्निना कार्या, दीक्षितेनाग्निकारिका ॥ १ ॥ दीक्षा मो-क्षार्थमाख्याता, ज्ञानध्यानफलं स च ॥ शास्त्रउक्तो यतः सूत्रं, शिवधर्मोत्तरे ह्यदः ॥ २ ॥ पूजया विपुलं राज्य, म-ग्निकार्येण संपदः ॥ तपः पापविशुध्ध्यर्थं, ज्ञानं ध्यानं च मुक्तिदम् ॥३॥ पापं च राज्यसंपत्सु, संजवत्यनघं ततः ॥ न त- ॥ २५

For Private and Personal Use Only

र्हेतोरुपादान, मिति सम्यग् विचिंत्यताम् ॥ ४ ॥ विशुद्धिश्चास्य तपसा न तु दानादिनैव यत् ॥ तदियं नान्यथा यु-
क्ता, तथा चोक्तं महात्मना ॥ ५ ॥ धर्मार्थं यस्य वित्तेहा, तस्यानीहा गरीयसी ॥ प्रक्षालनाद्धि पंकस्य, दूरादस्पर्श-
नं वरम् ॥ ६ ॥ मोक्षाध्वसेवया चैताः, प्रायः शुभतरा भुवि ॥ जायंते ह्यनपायिन्य, इयं सच्छास्त्रसंस्थितिः ॥ ७ ॥ ई-
॥ २६ ॥ ष्टापूर्त न मोक्षांगं, सकामस्योपवर्णितम् ॥ अकामस्य पुनर्योक्ता, सैव न्याय्याग्निकारिका ॥ ८ ॥

## ॥ अथ पंचमाष्टकं ॥

॥ सर्वसंपत्करी चैका, पौरुषघ्नी तथा परा ॥ वृत्तिभिक्षा च तत्त्वज्ञै, रिति भिक्षा त्रिधोदिता ॥ १ ॥ यतिर्ध्या-
नादियुक्तो यो, गुर्वाज्ञायां व्यवस्थितः ॥ सदानारंभिणस्तस्य, सर्वसंपत्करी मता ॥ २ ॥ वृद्धाद्यर्थमसंगस्य, भ्रमरो-
पमयाटतः ॥ गृहिदेहोपकाराय, विहितेति शुभाशयात् ॥ ३ ॥ प्रव्रज्यां प्रतिपन्नो य, स्तद्विरोधेन वर्तते ॥ असदारंभि-
णस्तस्य, पौरुषघ्नीति कीर्त्तिता ॥ ४ ॥ धर्मलाघवकृन्मूढो, भिक्षयोदरपूरणम् ॥ करोति दैन्यात्पीनांगः, पौरुषं हंति
केवलम् ॥ ५ ॥ निःस्वांधपंगवो ये तु, न शक्ता वै क्रियांतरे ॥ भिक्षामटंति वृत्त्यर्थं, वृत्तिभिक्षेयमुच्यते ॥ ६ ॥ नाति-
दुष्टापि चामीषा, मेषा स्यान्न ह्यमी तथा ॥ अनुकंपानिमित्तत्वाद्, धर्मलाघवकारिणः ॥ ७ ॥ दातृणामपि चैताभ्यः,
फलं क्षेत्रानुसारतः ॥ विज्ञेयमाशयाद्वापि, स विशुद्धः फलप्रदः ॥ ८ ॥

## ॥ अथ षष्ठाष्टकं ॥ ॥ २६ ॥

अकृतोऽकारितश्चान्यै, रसंकल्पित एव च ॥ यतेः पिंडः समाख्यातो, विशुद्धः शुद्धिकारकः ॥ १ ॥ यो न सं-
कल्पितः पूर्वं, देयबुद्ध्या कथं नु तम् ॥ ददाति कश्चिदेवं च, स विशुद्धो ह्ययोदितम् ॥ २ ॥ न चैवं सद्गृहस्थानां,

भिक्षा ग्राह्या गृहेषु यत् ॥ स्वपरार्थं तु ते यत्नं, कुर्वते नान्यथा क्वचित् ॥ ३ ॥ संकल्पनं विशेषेण, यत्रासौ दुष्ट इत्यपि ॥ परिहारो न सम्यक् स्या, द्यावदर्थिकवादिनः ॥ ४ ॥ विषयो वास्य वक्तव्यः, पुण्यार्थप्रकृतस्य च ॥ असंभवाभिधानात्स्या, दाप्तस्यानाप्ततान्यथा ॥ ५ ॥ विभिन्नं देयमाश्रित्य, स्वभोग्याद्यत्र वस्तुनि ॥ संकल्पनं क्रियाकाले, तद्दुष्टं विषयोऽनयोः ॥ ६ ॥ स्वोचिते तु यदारंभे, तथा संकल्पनं क्वचित् ॥ न दुष्टं शुभभावत्वात्, तच्छुद्धापरयोगवत् ॥ ७ ॥ दृष्टोऽसंकल्पितस्यापि, लाभ एवमसंभवः ॥ नोक्त इत्याप्ततासिद्धि, र्यतिधर्मोऽतिदुष्करः ॥ ८ ॥

## ॥ अथ सप्तमाष्टकं ॥

॥ सर्वारंभनिवृत्तस्य, मुमुक्षोर्भावितात्मनः ॥ पुण्यादिपरिहाराय, मतं प्रच्छन्नभोजनम् ॥ १ ॥ भुंजानं वीक्ष्य दीनादि, र्याचते क्षुत्प्रपीडितः ॥ तस्यानुकंपया दाने, पुण्यबंधः प्रकीर्तितः ॥ २ ॥ भवहेतुत्वतश्चायं, नेष्यते मुक्तिवादिनाम् ॥ पुण्यापुण्यक्षयान्मुक्ति, रिति शास्त्रव्यवस्थितेः ॥ ३ ॥ प्रायो न चानुकंपावां, स्तस्यादत्वा कदाचन ॥ तथाविधस्वभावत्वा, च्छक्नोति सुखमासितुम् ॥ ४ ॥ अदानेऽपि च दीनादे, रप्रीतिर्जायते ध्रुवम् ॥ ततोऽपि शासनद्वेष, स्ततः कुगतिसंततिः ॥ ५ ॥ निमित्तभावतस्तस्य, सत्युपाये प्रमादतः ॥ शास्त्रार्थबाधनेनेह, पापबंध उदाहृतः ॥ ६ ॥ शास्त्रार्थश्च प्रयत्नेन, यथाशक्ति मुमुक्षुणा ॥ अन्यव्यापारशून्येन, कर्तव्यः सर्वदैव हि ॥ ७ ॥ एवं ह्युभयथाप्येत, द्दुष्टं प्रकटभोजनम् ॥ यस्मान्निदर्शितं शास्त्रे, ततस्त्यागोऽस्य युक्तिमान् ॥ ८ ॥

## ॥ अथ अष्टमाष्टकं. ॥

द्रव्यतो भावतश्चैव, प्रत्याख्यानं द्विधा मतम् ॥ अपेक्षादिकृतं ह्याद्य, मतोऽन्यच्चरमं मतम् ॥ १ ॥ अपेक्षा या वि-


॥ २१ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





धिश्चैवा, परिणामस्तथैव च ॥ प्रत्याख्यानस्य विघ्नात्तु, वीर्याभावस्तथापरः ॥ २ ॥ लब्ध्याद्यपेक्षयाह्येत, दभव्यानामपि क्वचित् ॥ श्रूयते न च तत्किंचि, दित्यपेक्षात्र निंदिता ॥ ३ ॥ यथैवाविधिना लोके, न विद्याग्रहणादि यत् ॥ विपर्ययफलत्वेन, तथेदमपि भाव्यताम् ॥ ४ ॥ अक्षयोपशमात्त्याग, परिणामे तथा सति ॥ जिनाज्ञाभक्तिसंवेग, वैकल्यादेतदप्यसत् ॥ ५ ॥ उदग्रवीर्यविरहात्, क्लिष्टकर्मोदयेन यत् ॥ बाध्यते तदपि द्रव्य–प्रत्याख्यानं प्रकीर्तितम् ॥ ६ ॥ एतद्विपर्ययाद्भाव, प्रत्याख्यानं जिनोदितम् ॥ सम्यक्चारित्ररूपत्वान्, नियमान्मुक्तिसाधनम् ॥ ७ ॥ जिनोक्तमितिसद्भक्त्या, ग्रहणे द्रव्यतोऽप्यदः ॥ बाध्यमानं भवेद्भाव–प्रत्याख्यानस्य कारणम् ॥ ८ ॥

## ॥ अथ नवमाष्टकं ॥

॥ विषयप्रतिभासं चा—त्मपरिणतिमत्तथा ॥ तत्वसंवेदनं चैव, ज्ञानमाहुर्महर्षयः ॥ १ ॥ विषकंटकरत्नादौ, बालादिप्रतिभासवत् ॥ विषयप्रतिभासं स्यात्, तद्धेयत्वाद्यवेदकम् ॥ २ ॥ निरपेक्षप्रवृत्त्यादि, लिंगमेतदुदाहृतम् ॥ अज्ञानावरणापायं, महापायनिबंधनम् ॥ ३ ॥ पातादिपरतंत्रस्य, तद्दोषादावसंशयम् ॥ अनर्थाद्याप्तियुक्तं चा, त्मपरिणतिमन्मतम् ॥ ४ ॥ तथाविधप्रवृत्त्यादि, व्यंग्यं सदनुबंधि च ॥ ज्ञानावरणह्रासोत्थं, प्रायो वैराग्यकारणम् ॥ ५ ॥ स्वस्थवृत्तेः प्रशांतस्य, तद्धेयत्वादिनिश्चयम् ॥ तत्वसंवेदनं सम्यक्, यथाशक्तिफलप्रदम् ॥ ६ ॥ न्याय्यादौ शुद्धवृत्त्यादि, गम्यमेतत्प्रकीर्तितम् ॥ सद्ज्ञानावरणापायं, महोदयनिबंधनम् ॥७॥ एतस्मिन्सततं यत्नः, कुग्रहत्यागतो भृशम् ॥ मार्गश्रद्धादिभावेन, कार्य आगमतत्परैः ॥ ८ ॥

## ॥ अथ दशमाष्टकं ॥

॥ आर्त्तध्यानाख्यमेकं स्या, न्मोहगर्भं तथापरम् ॥ सद्ज्ञानसंगतं चेति, वैराग्यं त्रिविधं स्मृतम् ॥ १ ॥ इष्टेतर-
वियोगादि-निमित्तं प्रायशो हि यत् ॥ यथाशक्त्यपि हेयादा-वप्रवृत्त्यादिवर्जितम् ॥ २ ॥ उद्वेगकृद्विषादाढ्य-मा-
त्मघातादिकारणम् ॥ आर्तध्यानं ह्यदो मुख्यं, वैराग्यं लोकतो मतम् ॥ ३ ॥ एको नित्यस्तथाबद्धः, क्षय्यसन्वेह स-
॥ २७ ॥ र्वथा ॥ आत्मेति निश्चयाद्भूयो, भवनैर्गुण्यदर्शनात् ॥ ४ ॥ तत्त्यागायोपशांतस्य, सद्वृत्तस्यापि भावतः ॥ वैराग्यं त-
द्गतं यत्तन्, मोहगर्भमुदाहृतम् ॥ ५ ॥ भूयांसो नामिनो बद्धा, बाह्येनेच्छादिना ह्यमी ॥ आत्मानस्तद्वशात्कष्टं, भवे ति-
ष्ठंति दारुणे ॥ ६ ॥ एवं विज्ञाय तत्त्याग-विधिस्त्यागश्च सर्वथा ॥ वैराग्यमाहुः सद्ज्ञान-संगतं तत्वदर्शिनः ॥ ७ ॥
एतत्तत्वपरिज्ञाना-न्नियमेनोपजायते ॥ यतोऽतः साधनं सिद्धे, रेतदेवोदितं जिनैः ॥ ८ ॥

## ॥ अथ एकादशमाष्टकं ॥

॥ दुःखात्मकं तपः केचिन्, मन्यंते तन्न युक्तिमत् ॥ कर्मोदयस्वरूपत्वाद्, बलीवर्दादिदुःखवत् ॥ १ ॥ सर्व एव
च दुःख्येवं, तपस्वी संप्रसज्यते ॥ विशिष्टस्तद्विशेषेण, सुधनेन धनी यथा ॥ २ ॥ महातपस्विनश्चैवं, त्वन्नीत्या नारका-
दयः ॥ शमसौख्यप्रधानत्वा, द्योगिनस्त्वतपस्विनः ॥३॥ युक्त्यागमबहिर्भूत, मतस्त्याज्यमिदं बुधैः ॥ अशस्तध्यानजन-
नात्, प्राय आत्मापकारकम् ॥ ४ ॥ मनइंद्रिययोगाना-महानिश्चोदिता जिनैः ॥यतोऽत्र तत्कथं त्वस्य, युक्ता स्या-
द्दुःखरूपता ॥ ५ ॥ यापि चानशनादिभ्यः, कायपीडामनाक्क्वचित् ॥ व्याधिक्रियासमासापि, नेष्टसिद्ध्यात्र बाधनी ॥ २७ ॥
॥ ६ ॥ दृष्टा चेष्टार्थसंसिद्धौ, कायपीडा ह्यदुःखदा ॥ रत्नादिवणिगादीनां, तद्वदत्रापि भाव्यताम् ॥ ७ ॥ विशिष्ट-
ज्ञानसंवेग-शमसारमतस्तपः ॥ क्षायोपशमिकं ज्ञेय-मव्याबाधसुखात्मकम् ॥ ८ ॥

## ॥ अथ द्वादशमाष्टकं ॥

॥ शुष्कवादो विवादश्च, धर्मवादस्तथा परः ॥ इत्येष त्रिविधो वादः, कीर्तितः परमर्षिभिः ॥ १ ॥ असंतमानिना सार्धं, क्रूरचित्तेन च दृढम् ॥ धर्मद्विष्टेन मूढेन, शुष्कवादस्तपस्विनः ॥ २ ॥ विजयेऽस्यातिपातादि लाघवं तत्पराज-
 यात् ॥ धर्मस्येति द्विधाप्येष, तत्त्वतोऽनर्थवर्धनः ॥ ३ ॥ लब्धिख्यात्यर्थिना तु स्या, दुःस्थितेनामहात्मना ॥ छलजातिप्रधानो यः, स विवाद इति स्मृतः ॥ ४ ॥ विजयो ह्यत्र सन्नीत्या, दुर्लभस्तत्त्ववादिनः ॥ तद्भावेऽप्यंतरायादि–दोषोऽदृष्टविघातकृत् ॥ ५ ॥ परलोकप्रधानेन, मध्यस्थेन तु धीमता ॥ स्वशास्त्रज्ञाततत्त्वेन, धर्मवाद उदाहृतः ॥ ६ ॥ विजयेऽस्य फलं धर्म–प्रतिपत्त्याद्यनिंदितम् ॥ आत्मनो मोहनाशश्च, नियमात्तत्पराजयात् ॥ ७ ॥ देशाद्यपेक्षया चेह, विज्ञाय गुरुलाघवम् ॥ तीर्थकृज्ज्ञातमालोच्य, वादः कार्यो विपश्चिता ॥ ८ ॥

## ॥ अथ त्रयोदशमाष्टकं ॥

॥ विषयो धर्मवादस्य, तत्तत्तंत्रव्यपेक्षया ॥ प्रस्तुतार्थोपयोग्येव, धर्मसाधनलक्षणः ॥ १ ॥ पंचैतानि पवित्राणि, सर्वेषां धर्मचारिणाम् ॥ अहिंसासत्यमस्तेयं, त्यागो मैथुनवर्जनम् ॥ २ ॥ क्व खल्वेतानि युज्यंते, मुख्यवृत्त्या क्व वा नहि ॥ तंत्रे तत्तंत्रनीत्यैव, विचार्यं तत्त्वतो ह्यदः ॥ ३ ॥ धर्मार्थिभिः प्रमाणादे, र्लक्षणं न तु युक्तिमत् ॥ प्रयोजनाद्यभावेन, तथा चाह महामतिः ॥ ४ ॥ प्रसिद्धानि प्रमाणानि, व्यवहारश्च तत्कृतः ॥ प्रमाणलक्षणस्योक्तौ, ज्ञायते न प्रयोजनम् ॥ ५ ॥ प्रमाणेन विनिश्चित्य, तदुच्येत न वा ननु ॥ अलक्षितात्कथं युक्ता, न्यायतोऽस्यविनिश्चितिः ॥ ६ ॥ सत्यां चास्यां तदुक्त्या किं, तद्विषयविनिश्चितेः ॥ ततएव विनिश्चित्य, तस्योक्तिर्ध्यान्ध्यमेव हि ॥ ७ ॥ तस्माद्यथोदितं 

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वस्तु, विचार्यं रागवर्जितैः ॥ धर्मार्थिभिः प्रयत्नेन, तत इष्टार्थसिद्धितः ॥ ८ ॥

## ॥ अथ चतुर्दशमाष्टकं ॥

॥ तत्रात्मा नित्य एवेति, येषामेकांतदर्शनम् ॥ हिंसादयः कथं तेषां, युज्यंते मुख्यवृत्तितः ॥ १ ॥ निष्क्रियोऽसौ ततो हंति, हन्यते वा न जातु चित् ॥ किंचित्केनचिदित्येवं, न हिंसास्योपपद्यते ॥ २ ॥ अभावे सर्वथैतस्या, अहिंसापि न तत्वतः ॥ सत्यादीन्यपि सर्वाणि, नाहिंसासाधनत्वतः ॥ ३ ॥ ततः सन्नीतितो भावा-दमीषामसदेव हि ॥ सर्वं यस्मादनुष्ठानं, मोहसंगतमेव च ॥४॥ शरीरेणापि संबंधो, नात एवास्य संगतः ॥ तथा सर्वगतत्वाच्च, संसारश्चाप्यकल्पितः ॥ ५ ॥ ततश्चोर्ध्वगतिर्धर्मा-दधोगतिरधर्मतः ॥ ज्ञानान्मोक्षश्च वचनं, सर्वमेवौपचारिकम् ॥ ६ ॥ भोगाधिष्ठानविषये-ऽप्यस्मिन् दोषोऽयमेव तु ॥ तद्भेदादेव भोगोऽपि, निःक्रियस्य कुतो भवेत् ॥ ७ ॥ इष्यते चेत्क्रियाप्यस्य, सर्वमेवोपपद्यते ॥ मुख्यवृत्त्यानघं किंतु, परसिद्धांतसंश्रयः ॥ ८ ॥

## ॥ अथ पंचमाष्टकं ॥

॥ क्षणिकज्ञानसंतान-रूपेऽप्यात्मन्यसंशयम् ॥ हिंसादयो न तत्वेन, स्वसिद्धांतविरोधतः ॥ १ ॥ नाशहेतोरयोगेन, क्षणिकत्वस्य संस्थितिः ॥ नाशस्य चाऽन्यतोऽभावे, भवेद्धिंसाप्यहेतुका ॥ २ ॥ ततश्चास्याः सदा सत्ता, कदाचिन्नैव वा भवेत् ॥ कादाचित्कं हि भवनं, कारणोपनिबंधनं ॥ ३ ॥ न च संतानभेदस्य, जनको हिंसको भवेत्॥ ॥ ३१ ॥ सांवृतत्वान्न जन्यत्वं, यस्मादस्योपपद्यते ॥ ४ ॥ न च क्षणविशेषस्य, तेनैव व्यभिचारतः ॥ तथा च सोऽप्युपादान, भावेन जनको मतः ॥ ५ ॥ तस्यापि हिंसकत्वेन, न कश्चित्स्यादाहिंसकः ॥ जनकत्वाविशेषेण, नैवं तद्विरतिः क्वचित्

॥ ६ ॥ नुपन्यासश्च शास्त्रेऽस्याः, कृतो यत्नेन चिंत्यताम् ॥ विषयोऽस्य यमासाद्य, हंतैष सफलो भवेत् ॥ ७ ॥ अभावेऽस्या न युज्यंते, सत्यादीन्यपि तत्वतः ॥ अस्याः संरक्षणार्थं तु, यदेतानि मुनिर्जगौ ॥ ८ ॥

## ॥ अथ षोडशाष्टकं. ॥

॥ नित्यानित्ये तथा देहाद्, भिन्नाभिन्ने च तत्वतः ॥ घटंते आत्मनि न्यायाद्, हिंसादीन्यविरोधतः ॥ १ ॥ पीडाकर्तृत्वयोगेन, देहव्यापत्त्यपेक्षया ॥ तथा हन्मीति संक्लेशा–द्धिंसैषा सनिबंधना ॥ २ ॥ हिंस्यकर्मविपाकेऽपि, निमित्तत्वनियोगतः ॥ हिंसकस्य भवेदेषा, दुष्टादुष्टानुबंधतः ॥ ३ ॥ ततः सदुपदेशादेः, क्लिष्टकर्मवियोगतः ॥ शुभभावानुबंधेन, हंतास्याविरतिर्भवेत् ॥ ४ ॥ अहिंसैषा मता मुख्या, स्वर्गमोक्षप्रसाधनी ॥ एतत्संरक्षणार्थं च, न्याय्यं सत्यादिपालनम् ॥ ५ ॥ स्मरणप्रत्यभिज्ञान–देहसंस्पर्शवेदनात् ॥ अस्य नित्यादिसिद्धिश्च, तथा लोकप्रसिद्धितः ॥ ६ ॥ देहमात्रे च सत्यस्मिन्, स्यात्संकोचादिधर्मिणि ॥ धर्मादेरूर्ध्वगत्यादि, यथार्थसर्वमेव तु ॥ ७ ॥ विचार्यमेतत् सद्बुध्या, मध्यस्थेनांतरात्मना ॥ प्रतिपत्तव्यमेवेति, न खल्वन्यः सतां नयः ॥ ८ ॥

## ॥ अथ सप्तदशमाष्टकं. ॥

॥ भक्षणीयं सता मांसं, प्राण्यंगत्वेन हेतुना ॥ ओदनादिवदित्येवं, कश्चिदाहातितार्किकः ॥ १ ॥ भक्ष्याभक्ष्यव्यवस्थेह, शास्त्रलोकनिबंधना ॥ सर्वैव भावतो यस्मात्, तस्मादेतदसांप्रतम् ॥ २ ॥ तत्र प्राण्यंगमप्येकं, भक्ष्यमन्यत्तु नो तथा ॥ सिद्धं गवादिमत्क्षीर–रुधिरादौ तथेक्षणात् ॥ ३ ॥ प्राण्यंगत्वेन नच नो, भक्षणीयं त्विदं मतम् ॥ किंत्वन्यजीवभावेन, तथा शास्त्रप्रसिद्धितः ॥ ४ ॥ भिक्षुमांसनिषेधोऽपि, न चैवं युज्यते क्वचित् ॥ अस्थ्याद्यपि च

न्नक्ष्यं स्यात्, प्राण्यंगत्वाविशेषतः ॥ ५ ॥ एतावन्मात्रसाम्येन, प्रवृत्तिर्यदि चेष्यते ॥ जायायां स्वजनन्यां च, स्त्रीत्वात्तुल्यैव सास्तु ते ॥ ६ ॥ तस्माच्छास्त्रं च लोकं च, समाश्रित्य वदेद् बुधः ॥ सर्वत्रैवं बुधत्वं स्या, दन्यथोन्मत्ततुल्यता ॥ ७ ॥ शास्त्रे चाप्तेन वोऽप्येत, न्निषिद्धं यत्नतो ननु ॥ लंकावतारसूत्रादौ, ततोऽनेन न किंचन ॥ ८ ॥

## ॥ अथ अष्टादशमाष्टकं. ॥

॥ अन्योऽविमृश्य शब्दार्थ—न्यायंस्वयमुदीरितम् ॥ पूर्वापरविरुद्धार्थ—मेव माहात्र वस्तुनि ॥ १ ॥ न मांसन्नक्षणे दोषो, न मद्ये न च मैथुने ॥ प्रवृत्तिरेषा भूतानां, निवृत्तिस्तु महाफला ॥ २ ॥ मां स नक्षयितामुत्र, यस्य मांसमिहाद्म्यहम् ॥ एतन्मांसस्य मांसत्वं, प्रवदंति मनीषिणः ॥ ३ ॥ इत्थं जन्मैव दोषोऽत्र, न शास्त्राद्बाह्यन्नक्षणम् ॥ प्रतीत्यैपनिषेधश्च, न्याय्यो वाक्यांतरादुगतः ॥ ४ ॥ प्रोक्षितं न्नक्षयेन्मांसं, ब्राह्मणानां च काम्यया ॥ यथाविधिनियुक्तस्तु, प्राणानामेववात्यये ॥ ५ ॥ अत्रैवासावदोषश्चे, न्निर्वृत्तिर्नास्य सज्यते ॥ अन्यदा न्नक्षणादत्रा, न्नक्षणे दोषकीर्तनात् ॥ ६ ॥ यथाविधिनियुक्तस्तु, यो मांसं नात्ति वै द्विजः ॥ स प्रेत्य पशुतां याति, संन्नवानेकविंशती ॥ ७ ॥ पारिव्राज्यं निवृत्तिश्चेद्, यस्तदप्रतिपत्तितः ॥ फलान्नावः स एवास्य, दोषो निर्दोषतैव न ॥ ८ ॥

## ॥ अथ एकोनविंशतीतमाष्टकं. ॥

॥ मद्यं पुनः प्रमादांगं, तथा सच्चित्तनाशनम् ॥ संधानदोषवत्तत्र, न दोष इति साहसम् ॥ १ ॥ किं वेह बहुनोक्तेन, प्रत्यक्षेणैव दृश्यते ॥ दोषोऽस्य वर्तमानेऽपि, तथा न्नंडनलक्षणः ॥ २ ॥ श्रूयते च ऋषिर्मद्यात्, प्राप्तज्योतिर्महातपाः ॥ स्वर्गांगनान्निराक्षिप्तो, मूर्खवन्निधनं गतः ॥ ३ ॥ कश्चिदृषिस्तपस्तेपे, न्नीतइंद्रः सुरस्त्रियः ॥ क्षोन्नाय प्रेषया-

मास, तस्यागसचतास्तकम् ॥ ४ ॥ विनयेन समाराध्य, वरदाभिमुखं स्थितम् ॥ जगुर्मद्यं तथा हिंसां, सेवस्वाब्रह्म वेच्छया ॥ ५ ॥ स एवं गदितस्ताभि, र्द्वयोर्नरकहेतुताम् ॥ आलोच्य मद्यरूपं च, शुद्धकारणपूर्वकम् ॥ ६ ॥ मद्यं प्रपद्यतद्भोगान्, नष्टधर्मस्थितिर्मदात् ॥ विदंशार्थमजं हत्वा, सर्वमेव चकार सः ॥ ७ ॥ ततश्च भ्रष्टसामर्थ्यः, स मृत्वा दुर्गतिं गतः ॥ इत्थं दोषाकरो मद्यं, विज्ञेयं धर्मचारिभिः ॥ ८ ॥

## ॥ अथ विंशतितमाष्टकं. ॥

॥ रागादेव नियोगेन, मैथुनं जायते यतः ॥ ततः कथं न दोषोऽत्र, येन शास्त्रे निषिध्यते ॥ १ ॥ धर्मार्थं पुत्रकामस्य, स्वदारेष्वधिकारिणः ॥ ऋतुकाले विधानेन, यत्स्यादोषो न तत्र चेत् ॥ २ ॥ नापवादिककल्पत्वा, न्नैकांतेनेत्यसंगतम् ॥ वेदं ह्यधीत्य स्नायाद्य, दधीत्यैवेति शासितम् ॥ ३ ॥ स्नायादेवेति न तु यत्, ततो हीनो गृहाश्रमः ॥ तत्र चैतदतो न्याया, त्प्रशंसास्य न युज्यते ॥ ४ ॥ अदोषकीर्तनादेव, प्रशंसा चेत्कथं भवेत् ॥ अर्थापत्त्या सदोषस्य, दोषाभावप्रकीर्तनात् ॥ ५ ॥ तत्र प्रवृत्तिहेतुत्वात्, त्याज्यबुद्धेरसंभवात् ॥ विध्युक्तेरिष्टसंसिद्धे, रुक्तिरेषा न भद्रिका ॥ ६ ॥ प्राणिनां बाधकं चैत, च्छास्त्रे गीतं महर्षिभिः ॥ नलिकातप्तकणक-प्रवेशज्ञाततस्तथा ॥ ७ ॥ मूलं चैतदधर्मस्य, भवभावप्रवर्धनम् ॥ तस्माद्विषान्नवत्त्याज्य-मिदं मृत्युमनिच्छता ॥ ८ ॥

## ॥ अथ एकविंशतितमाष्टकं. ॥ 

॥ सूक्ष्मबुद्ध्या सदा ज्ञेयो, धर्मो धर्मार्थिभिर्नरैः ॥ अन्यथा धर्मबुद्ध्यैव, तद्विघातः प्रसज्यते ॥ १ ॥ गृहित्वा ग्लानभैषज्य-प्रदानाभिग्रहं यथा ॥ तदप्राप्तौ तदंतेऽस्य, शोकं समुपगच्छतः ॥ २ ॥ गृहितोऽभिग्रहः श्रेष्ठो । ग्लानो

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



जातो नच कचित् ॥ अर्हों मे धन्यता कष्टं । न सिद्धमजिवांछितं ॥ ३ ॥ एवं ह्येतत्समादान-ग्लानजावाजिसंधि-
मत् ॥ साधूनां तत्वतो यत्तद्-ङुष्टं ज्ञेयं महात्मजिः ॥ ४ ॥ लौकिकैरपि चैषोऽर्थो, दृष्टः सूक्ष्मार्थदर्शिजिः ॥ प्रका-
रांतरतः कैश्चि-द्यत एतदुदाहृतं ॥ ५ ॥ अंगेष्वेव जरा यातु, यत्त्वयोपकृतं मम ॥ नरः प्रत्युपकाराय, विपत्सु लजते
फलं ॥ ६ ॥ एवं विरुद्धदानादौ । हीनोत्तमगतेः सदा ॥ प्रव्रज्यादिविधाने च । शास्त्रोक्तन्यायबाधिते ॥ ७ ॥ ङव्या-
दिजेदतो ज्ञेयो । धर्मव्याघात एव हि ॥ सम्यगूमाध्यस्थ्यमालंब्य, श्रुतधर्मव्यपेक्षया ॥ ८ ॥ युग्मम् ॥

## ॥ अथ द्वाविंशतितमाष्टकं. ॥

जावशुद्धिरपि ज्ञेया, यैषा मार्गानुसारिणी ॥ प्रज्ञापनाप्रियात्यर्थं, न पुनः स्वाग्रहात्मिका ॥ १ ॥ रागो द्वेषश्च
मोहश्च, जावमालिन्यहेतवः ॥ एतदुत्कर्षतो ज्ञेयो, हंतोत्कर्षोऽस्य तत्वतः ॥ २ ॥ तथोत्कृष्टे च सत्यस्मिन्, शुद्धिर्वै
शब्दमात्रकं ॥ स्वबुद्धिकल्पनाशील्प-निर्मितं नार्थवद्भवेत् ॥ ३ ॥ न मोहोद्रिक्तताजावे, स्वाग्रहो जायते कचित् ॥
गुणवत्पारतंत्र्यं हि, तदनुत्कर्षसाधनं ॥ ४ ॥ अत एवागमज्ञोऽपि, दीक्षादानादिषु ध्रुवं ॥ क्षमाश्रमणहस्तेने-त्याह
सर्वेषु कर्मसु ॥ ५ ॥ इदं तु यस्य नास्त्येव, स नोपायोऽपि वर्त्तते ॥ जावशुद्धः स्वपरयो-र्गुणाद्यज्ञस्य सा कुतः ॥ ६ ॥
तस्मादासन्नजव्यस्य, प्रकृत्या शुद्धचेतसः ॥ स्थानमानांतरज्ञस्य, गुणवद्बहुमानिनः ॥ ७ ॥ औचित्येन प्रवृत्तस्य, कु-
ग्रहत्यागतो भृशं ॥ सर्वत्रागमनिष्ठस्य, जावशुद्धिर्यथोदिता ॥ ८ ॥

## ॥ अथ त्रयोविंशतितमाष्टकं. ॥

यः शासनस्य मालिन्ये-ऽनाजोगेनापि वर्त्तते ॥ स तन्मिथ्यात्वहेतुत्वा-दन्येषां प्राणिनां ध्रुवं ॥ १ ॥ बध्ना-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





स्यपि तद्देवालं, परं संसारकारणं ॥ विपाकदारुणं घोरं, सर्वानर्थविवर्धनं ॥ २ ॥ यस्तून्नतौ यथाशक्ति, सोऽपि सम्यक्त्वहेतुतां ॥ अन्येषां प्रतिपद्येह, तदेवाप्नोत्यनुत्तरं ॥ ३ ॥ प्रक्षीणतीव्रसंक्लेशं, प्रशमादिगुणान्वितं ॥ निमित्तं सर्वसौख्यानां, तथा सिद्धिसुखावहं ॥ ४ ॥ अतः सर्वप्रयत्नेन, मालिन्यं शासनस्य तु ॥ प्रेक्षावता न कर्त्तव्यं, प्रधानं पापसाधनं ॥ ५ ॥ अस्माच्छासनमालिन्या-ज्जातौ जातौ विगर्हितं ॥ प्रधानभावादात्मानं, सदा दूरीकरोत्यलं ॥ ६ ॥ कर्त्तव्या चोन्नतिः सत्यां-शक्ताविह नियोगतः ॥ अवंध्यं बीजमेषा य-त्तत्वतः सर्वसंपदां ॥ ७ ॥ अत उन्नतिमाप्नोति, जातौ जातौ हितोदयं ॥ क्षयं नयति मालिन्यं, नियमात्सर्ववस्तुषु ॥ ८ ॥

## ॥ अथ चतुर्विंशतितमाष्टकं. ॥

गेहाद्गेहांतरं कश्चि-च्छोभनादधिकं नरः ॥ याति यद्वत्सुधर्मेण, तद्वदेव भवाद्भवं ॥ १ ॥ गेहाद्गेहांतरं कश्चि-च्छोभनादितरं नरः ॥ याति यद्वदसद्धर्मा-त्तद्वदेव भवाद्भवं ॥ २ ॥ गेहाद्गेहांतरं कश्चि-दशुभादधिकं नरः ॥ याति यद्वन्महापापा-त्तद्वदेव भवाद्भवं ॥ ३ ॥ गेहाद्गेहांतरं कश्चि-दशुभादितरन्नरः ॥ याति यद्वत्सुधर्मेण, तद्वदेवभवाद्भवं ॥ ४ ॥ शुभानुबंध्यतः पुण्यं, कर्तव्यं सर्वथा नरैः ॥ यत्प्रभावादपातिन्यो, जायंते सर्वसंपदः ॥ ५ ॥ सदागमविशुद्धेन, क्रियते तच्च चेतसा ॥ एतच्च ज्ञानवृद्धेभ्यो, जायते नान्यतः क्वचित् ॥ ६ ॥ चित्तरत्नमसंक्लिष्ट—मांतरं धनमुच्यते ॥ यस्य तन्मूषितं दोषै—स्तस्य शिष्टा विपत्तयः ॥ ७ ॥ दया भूतेषु वैराग्यं, विधिवद्गुरुपूजनं ॥ विशुद्धा शीलवृत्तिश्च, पुण्यं पुण्यानुबंध्यदः ॥ ८ ॥

## ॥ अथ पंचविंशतितमाष्टकं. ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अतः प्रकर्षसंप्राप्ता-द्विज्ञेयं फलमुत्तमं ॥ तीर्थकृत्त्वं सदौचित्य-प्रवृत्त्या मोक्षसाधकं ॥ १ ॥ सदौचित्यप्रवृत्तिश्च, गर्भादारभ्य तस्य यत् ॥ तत्राप्यभिग्रहो न्याय्यः, श्रूयते हि जगद्गुरोः ॥ २ ॥ पित्रुद्वेगनिरासाय, महतां स्थितिसिद्धये ॥ इष्टकार्यसमृद्ध्यर्थ-मेवं भूतो जिनागमे ॥ ३ ॥ जीवतो गृहवासेऽस्मिन्, यावन्मे पितराविमौ ॥ तावदेवाधिवत्स्यामि, गृहानहमपीष्टतः ॥ ४ ॥ इमौ शुश्रूषमाणस्य, गृहानावसतो गुरू ॥ प्रव्रज्याप्यानुपूर्व्येण, न्याय्यांते मे भविष्यति ॥ ५ ॥ सर्वपापनिवृत्तिर्यत्, सर्वथैषा सतां मता ॥ गुरूद्वेगकृतोऽत्यंतं, नेयं न्याय्योपपद्यते ॥ ६ ॥ प्रारंभमंगलं ह्यस्या, गुरुशुश्रूषणं परं ॥ एतौ धर्मप्रवृत्तानां, नृणां पूजास्पदं महत् ॥ ७ ॥ स कृतज्ञः पुमान् लोके, स धर्मगुरुपूजकः ॥ स शुद्धधर्मभाक् चैव, य एतौ प्रतिपद्यते ॥ ८ ॥

## ॥ अथ षड्विंशतितमाष्टकं. ॥

जगद्गुरोर्महादानं, संख्यावच्चेत्यसंगतं ॥ शतानि त्रीणि कोटीनां, सूत्रमित्यादि चोदितं ॥ १ ॥ अन्यैस्त्वसंख्यमन्येषां, स्वतंत्रेषूपवर्ण्यते ॥ तत्तदेवेह तद्युक्तं, महच्छब्दोपपत्तितः ॥ २ ॥ ततो महानुभावत्वात्, तेषामेवेह युक्तिमत्॥ जगद्गुरुत्वमखिलं, सर्वं हि महतां महत् ॥ ३ ॥ एवमाहेह सूत्रार्थं, न्यायतोऽनवधारयन् ॥ कश्चिन्मोहात्ततस्तस्य, न्यायलेशोऽत्र दर्श्यते ॥ ४ ॥ महादानं हि संख्याव-दर्थ्यभावाज्जगद्गुरोः ॥ सिद्धंवरवरिकात-स्तस्याः सूत्रे विधानतः ॥ ५ ॥ तयासह कथं संख्या, युज्यते व्यभिचारतः ॥ तस्माद्यथोदितार्थं तु, संख्याग्रहणमिष्यतां ॥ ६ ॥ महानुभावताप्येषा, तद्भावेन यदर्थिनः ॥ विशिष्टसुखयुक्तत्वात्, संति प्रायेण देहिनः ॥ ७ ॥ धर्मोद्यताश्च तद्योगा-त्तदा ते तत्वदर्शिनः ॥ महन्महत्वमस्यैव-मयमेव जगद्गुरुः ॥ ८ ॥



For Private and Personal Use Only

## ॥ अथ सप्तविंशतितमाष्टकं. ॥

कश्चिदाहास्य दानेन, क इवार्थः प्रसिध्यति ॥ मोक्षगामी ध्रुवं ह्येष, यतस्तेनैव जन्मना ॥ १ ॥ उच्यते कल्प एवास्य, तीर्थकृन्नामकर्मणः ॥ उदयात्सर्वसत्वानां, हित एव प्रवर्तते ॥ २ ॥ धर्मांगख्यापनार्थं च, दानस्यापि महामतिः ॥ अवस्थौचित्ययोगेन; सर्वस्यैवानुकंपया ॥ ३ ॥ शुभाशयकरं ह्येत–दाग्रहच्छेदकारि च ॥ सदभ्युदयसारांग–मनुकंपाप्रसूति च ॥ ४ ॥ ज्ञापकं चात्र भगवान्, निष्क्रांतोऽपि द्विजन्मने ॥ देवदूष्यं ददद्धीमा–ननुकंपाविशेषतः ॥ ५ ॥ इत्थमाशयभेदेन, नातोऽधिकरणं मतं ॥ अपित्वन्यगुणस्थानं, गुणांतरनिबंधनं ॥ ६ ॥ येतु दानं प्रशंसंती–त्यादि सूत्रं तु यत्स्मृतं ॥ अवस्थाभेदविषयं, द्रष्टव्यं तन्महात्मभिः ॥ ७ ॥ एवं न कश्चिदस्यार्थ–स्तत्वतोऽस्मात् प्रसिध्यति ॥ अपूर्वः किंतु तत्पूर्व–मेवं कर्म प्रहीयते ॥ ८ ॥

## ॥ अथ अष्टविंशतितमाष्टकं ॥

अन्यस्त्वाहास्य राज्यादि–प्रदाने दोष एव तु ॥ महाधिकरणत्वेन, तत्त्वमार्गेऽविचक्षणः ॥ १ ॥ अप्रदाने हि राज्यस्य, नायकाभावतो जनाः ॥ मिथो वै कालदोषेण, मर्यादाभेदकारिणः ॥२॥ विनश्यंत्यधिकं यस्मा–दिह लोके परत्र च ॥ शक्तौ सत्यामुपेक्षा च, युज्यते न महात्मनः ॥ ३ ॥ तस्मात्तदुपकाराय, तत्प्रदानं गुणावहं ॥ परार्थदीक्षितस्यास्य, विशेषेण जगद्गुरोः ॥ ४ ॥ एवं विवाहधर्मादौ, तथा शिल्पनिरूपणे ॥ न दोषो ह्युत्तमं पुण्य–मित्थमेव विपच्यते ॥ ५ ॥ किंचेहाधिकदोषेभ्यः, सत्वानां रक्षणं तु यत् ॥ उपकारस्तदेवैषां, प्रवृत्त्यंगं तथास्य च ॥ ६ ॥ नागादे रक्षणं यद्वद्, गर्त्ताद्याकर्षणेन तु ॥ कुर्वन्न दोषवांस्तद्व–दन्यथासंभवादयं ॥ ७ ॥ इष्टं चैतदिहैष्टव्य–मन्यथा दे-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





शनाच्छलं ॥ कुतर्कादिनिमित्तत्वा–द्देपायैव प्रतज्यते ॥ ८ ॥

## ॥ अथ एकोनत्रिंशाततमाष्टकं ॥

सामायिकं च मोक्षांगं. परं सर्वज्ञजाषितं ॥ वासिचंदनकल्पाना—मुक्तमेतन्महात्मनां ॥ १ ॥ निर्वद्यमिदं ज्ञेय–मेकांतेनैव तत्वतः ॥ कुशलाशयरूपत्वात्, सर्वयोगविशुद्धितः ॥ २ ॥ यत्पुनः कुशलं चित्तं, लोकदृष्ट्या व्यवस्थितं ॥ तत्तथौदार्ययोगेऽपि, चिंत्यमानं न तादृशं ॥ ३ ॥ मय्येव निपतत्वेत–ज्जगद्दुश्चरितं यथा ॥ मत्सुचरितयोगाच्च । मुक्तिः स्यात् सर्वदेहिनां ॥ ४ ॥ असंजवीदं यद्वस्तु, बुद्धानां निर्वृतिश्रुतेः ॥ संजवित्वे त्वियं न स्या–त्तत्रैकस्यापि निर्वृतौ ॥ ५ ॥ तदेवं चिंतनं न्याया–त्तत्वतो मोहसंगतं ॥ साध्ववस्थांतरे ज्ञेयं, बोध्यादेः प्रार्थनादिवत् ॥ ६ ॥ अपकारिणि सद्बुद्धि–र्विशिष्टार्थप्रसाधनात् ॥ आत्मंजरित्वपिशुना–तदाशायानपेक्षिणी ॥ ७ ॥ एवं सामायिकादन्य–दवस्थांतरजद्रकं ॥ स्याच्चित्तं तत्तु संशुद्धे–र्ज्ञेयमेकांतजद्रकं ॥ ८ ॥

## ॥ अथ त्रिंशाततमाष्टकं. ॥

सामायिकविशुद्धात्मा, सर्वथा घातिकर्मणः ॥ क्ष्यात्केवलमाप्नोति, लोकालोकप्रकाशकं ॥ १ ॥ ज्ञाने तपसि चारित्रे, सत्येवास्योपजायते ॥ विशुद्धिस्तदंतस्तस्य, तथा प्राप्तिरिहेष्यते ॥ २ ॥ स्वरूपमात्मनो ह्येतत्, किंत्वनादिमलावृतं ॥ जात्यरत्नांशुवत्तस्य, क्ष्यात्स्यात्तदुपायतः ॥ ३ ॥ आत्मनस्तत्स्वजावत्वा–ल्लोकालोकप्रकाशकं ॥ अत एव तदुत्पत्ति–समयेऽपि यथोदितं ॥ ४ ॥ आत्मस्थमात्मधर्मत्वात् । संवित्त्या चैवमिष्यते ॥ गमनादेरयोगेन, नान्यथा तत्वमस्य तु ॥ ५ ॥ यच्च चंद्रप्रजाद्यत्र, ज्ञातं तदूज्ञातमात्रकं ॥ प्रजापुद्गलरूपाय—त्तद्धर्मोनोपपद्यते ॥ ६ ॥ अतः स- ॥ ३९ ॥

वंगताभास—मप्येतन्न यदन्यथा ॥ युज्यते तेन सन्न्यायात्, संविग्ना दोऽपि भाव्यतां ॥ ७ ॥ नाऽङ्गभ्योऽस्ति गुणो लोके, न धर्मांतौ विभुर्न च ॥ आत्मा तद्गमनाद्यस्य, नास्तु तस्माद्यथोदितं ॥ ८ ॥



## ॥ अथ एकत्रिंशतितमाष्टकं ॥

वीतरागोऽपि सद्वेद्य–तीर्थकृन्नामकर्मणः ॥ उदयेन तथा धर्म—देशनायां प्रवर्तते ॥ १ ॥ वरबोधित आरभ्य, परार्थोद्यत एव हि ॥ तथाविधं समादत्ते, कर्मस्फीताशयः पुमान् ॥२॥ यावत्संतिष्ठते तस्य, तत्तावत्संप्रवर्त्तते ॥ तत्स्वभावत्वतो धर्म—देशनायां जगद्गुरुः ॥ ३ ॥ वचनं चैकमप्यस्य । हितां भिन्नार्थगोचरां ॥ भूयसामपि सत्वानां, प्रतिपत्ति करोत्यलं ॥ ४ ॥ अचिंत्यपुण्यसंभार—सामर्थ्यादेतदीदृशं ॥ तथा चोत्कृष्टपुण्यानां नास्त्यसाध्यं जगत्रये ॥ ५ ॥ अभव्येषु च भूतार्था, यदसौ नोपपद्यते ॥ तत्तेषामेव दौर्गुण्यं, ज्ञेयं भगवतो न तु ॥ ६ ॥ दृष्टश्चाभ्युदये भानोः, प्रकृत्या क्लिष्टकर्मणां ॥ अप्रकाशो ह्युलूकानां, तद्वदत्रापि भाव्यतां ॥ ७ ॥ इयं च नियमाद् ज्ञेया, तथानंदाय देहिनां ॥ तदात्वे वर्त्तमानेऽपि, भव्यानां शुद्धचेतसां ॥ ८ ॥

## ॥ अथ द्वात्रिंशत्तमाष्टकं ॥

कृत्स्नकर्मक्षयान्मोक्षो । जन्ममृत्य्वादिवर्जितः ॥ सर्वबाधाविनिर्मुक्त–एकांतसुखसंगतः ॥ १ ॥ यन्न दुःखेन संभिन्नं, नच भ्रष्टमनंतरं ॥ अभिलाषापनीतं यत्, तद् ज्ञेयं परमं पदं ॥ २ ॥ कश्चिदाहान्नपानादि–भोगाभावादसंगतं ॥ ॥ ४० ॥
सुखं वै सिद्धिनायानां, पृष्टव्यः स पुमानिदं ॥ ३ ॥ किं फलोऽन्नादिसंभोगो, बुभुक्षादिनिवृत्तये ॥ तन्निवृत्तेः फलं किं स्यात्, स्वास्थ्यं तेषां तु तत्सदा ॥ ४ ॥ अस्वस्थस्यैव भैषज्यं, स्वस्थस्य तु न दीयते ॥ अवाप्तस्वास्थ्यकोटीनां,

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





भोगोऽनादिरपायकः ॥ ५ ॥ अकिंचित्करकं ज्ञेयं, मोहाभावाद्रताद्यपि ॥ तेषां कंड्वाद्यभावेन, हंत कंडूयनादिव-
त् ॥ ६ ॥ अपरायत्तमौत्सुक्य-रहितं निष्प्रतिक्रियं ॥ सुखं स्वाभाविकं तत्र, नित्यं भयविवर्जितं ॥ ७ ॥ परमानंद-
रूपं तद्, गीयतेऽन्यैर्विचक्षणैः ॥ इत्थं सकलकल्याण-रूपत्वात्सांप्रतं ह्यदः ॥ ८ ॥ संवेद्यं योगिनामेत-दन्येषां श्रुति-
गोचरः ॥ उपमाभावतो व्यक्त-मभिधातुं न शक्यते ॥ ९ ॥ अष्टकाख्यं प्रकरणं, कृत्वा यत्पुण्यमर्जितं ॥ विरहा-
त्तेन पापस्य, भवंतु सुखिनो जनाः ॥ १० ॥

॥ इति श्री हरिभद्रसूरिकृतान्यष्टकानि समाप्तानि ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इति श्रीयुक्तिप्रकाशसटीक-श्रीस्याद्वादकलिका-अष्टकानि च समाप्तानि.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

हुक्तिककानादिविवरणं २२

For Private and Personal Use Only